

# काव्यश्रीः।

|| श्रीः ||

# काव्यश्रीः ।


रचयिता

विद्यावाचस्पतिः श्री. श्रीहरिः वासुदेवः गोकर्णकरः



मुद्रकः

सरफोजीराजे भोसले रिसर्च सेंटर, मुंबई.

**First Edition:**
श्रावण पूर्णिमा, २०२०
विक्रम संवत् , २०७७
कलियुगाब्द ५१२१

**© : All Rights Reserved.**

**E-copy**
**Not for Sale**

**Released by**
SARFOJIRAJE BHOSALE CENTRE
3rd Flr., Triveni Sangam Mun. Sch. Bldg.,
Mahadev Palav Marg, Lower Parel (E), Currey Road (E),
Mumbai - 400012. Maharashtra (INDIA)
Tele/Fax.: +91-22-24703849, +919322677311, +919869205891
Email : sandhyapurecha2010@gmail.com,
sarfojiraje@gmail.com

# अनुक्रमणिका


- प्रास्ताविकसुभाषितानि । ... 1
- स्फुटश्लोकाः । ... 2
- स्तोत्रसुधा ।

१) श्रीउमानन्दपञ्चकम् । ... 6
२) श्रीगणेशपञ्चकम् । ... 8
३) श्रीकृष्णसप्तकम् । ... 9
४) शिवपञ्चकम् । ... 11
५) उमासप्तकम् । ... 13
६) नवदुर्गास्तोत्रम् । ... 15
७) देवीप्रसादपञ्चकम् । ... 17
८) मह्लारपञ्चकम् । ... 18
९) सामर्थ्याष्टकम् । ... 19
१०) रक्षासप्तकम् । ... 20
११) दशावतारस्तोत्रम् । ... 21
१२) यमुनालहरी । ... 23
१३) तरङ्गिणीपञ्चकम् । ... 25
१४) नदीस्तोत्रम् । ... 26
१५) नर्मदास्तोत्रम् । ... 27

- प्रशस्तिकाव्यम् ।

१) नम्यः शिवराजः ।. ... 28
२) तिलकस्मरणम् । ... 29
३) नटवर्यसप्तकम् । ... 30
४) सन्ध्यासप्तकम् । ... 32
५) गौरीस्थिता हि माधुरी । ... 34
६) मञ्जूषाष्टकम् । ... 36

७) नवलाष्टकम् । ... 38
८) रेखासप्तकम् । ... 40

• बालगीतानि ।
१) वर्षाकाल: । ... 42
२) रे वृक्ष रे वृक्ष । ... 43
३) स्वापगीतम् । ... 44
४) सूर्य उदेति पूर्वदिशि । ... 45
५) मे तात: । ... 46

• काव्यसुधा ।
१) भाग्यं मे भारतम् । ... 47
२) अमृता विश्वविद्यापीठम् । ... 48
३) प्रकृतिपुरुषसंवाद: । ... 49
४) गान्धार्या: मनोगतम् । ... 51
५) नारीगौरवम् । ... 53
६) रचयेम संस्कृतकवनम् । ... 54
७) मैत्रीपञ्चकम् । ... 55
८) योगपञ्चकम् । ... 55
९) वाचनपञ्चकम् । ... 56
१०) जपमाहात्म्यम् । ... 56
११) श्रुतिलय: । ... 57
१२) मासेषु ऋतव: । ... 58
१३) उत्तमयुवको भवामि नित्यम् । ... 59
१४) कीदृशं देशवन्दनम्? ... 60
१५) प्रहेलिका: । ... 60
१६) समस्यापूर्ति: । ... 61
१७) ठण् ठण् पपम् पम् छछछञ् टटण् ट: । ... 62
१८) वृत्तबद्धपद्यानि । ... 63

१९) तव सौन्दर्यम् । ( संस्कृतगझल ) ... 65
२०) हृत्प्रेम । ( संस्कृतगझल ) ... 66
२१) सखि त्वम् । ( संस्कृतगझल ) ... 67
२२) भवती मामकी। ... 68
२३) दृष्टा शकटी सा । ... 69
२४) ध्रुवा-महोत्सव-शीर्षकगीतम् । ... 71
२५) मङ्गलाष्टकम् । ... 72
२६) ते विवाहार्थम् । ... 74
२७) अपूर्वानचिकेतसौ । ... 75
२८) वृत्तनिवेदनम् । ... 76
२९) धन्यास्ते राष्ट्रसेवकाः । ... 80
३०) सुखम्भरा वसुन्धरा । ... 81

- छन्दोदेवादिसंग्रहः । ... 83

-----

# *Flowering of Poetry – Kavyashree*



Prof. N.P.Unni

The present collection of various colorful flowers of poetry represents the outpouring of a gifted poet on various topics that attracted his feelings from time to time. The topics included herein are benedictions of gods, preservation of nature, muses on a variety of topics included under the head Stotrasudhā –ambrosia on devotional ballads on a youngster's feelings and then a major section consisting of different topics which pertain to various noble aspects of human life. Ace this represents the talents of a mature poet who has appreciated Sanskrit poetry at first hand. Various types of poetry consisting of Pañcakas, Ṣaṭkas, Aṣṭkas etc. are to be seen in this collection. The Lahari-s form is an interesting section which reminds one Saundaryalahari and similar compositions of Jagannatha Pandit the foremost among the authors on Alaṅkāraśāstra.

One can distinguish the outlook of a well-balanced writer on Sanskrit Poetical literature. I have enjoyed the reading this assorted creation and I am sure where it is printed and presented to a wide range of literary men, it will be appreciated with an unbiased mind.

I had the good fortune of meeting this young scholar at the venue of Rashtriya Samskrit Samsthan, Purunattakara, Trissure Campus. I cherish those few days where I too had an occasion to interact with youngsters.

I wish all success to this young friend of mine and I hope that he will go further in this chosen field and win much appreciation.

08.11.2019




Prof. N.P.Unni
Ex-Vice Chancellor Sree Sankaracharya
University of Sanskrit,
Kalady, Kerala.

## KĀVYAŚRĪḤ



Dr. Visalakshy

Author: Vidyāvācaspati Śrī Śrīhari Vāsudeva Gokarṇakara.

Reviewed by Dr.P. Visalakshy,

Director & Professor, (Retd.)

Oriental Research Institute & Manuscripts Library,

University of Kerala, Thiruvananthapuram.

The poetical work 'KĀVYAŚRĪḤ' authored by Vidyāvācaspati Śrī Śrīhari Vāsudeva Gokarṇakara is divided into four sections. viz: (1) Stotrasudhā consisting of fifteen stotra-s, (2) Praśastikāvyam consisting of seven eulogistic short poems (3) Bālagitāni consisting of five nursery rhymes and (4) Kāvyasudhā consisting of twenty-four poems. Before the actual Commencement Prāstāvikasubhāṣita-s and Sphuṭaśloka-s are included. In this part, the author has shown his great adoration to Sanskrit language and enlighten the readers the exalted position occupied by the legends like Ācārya Pāṇini, Mahākavi Kālidāsa, Bhāsa and their contributions to promote Sanskrit language and literature.

'Stotrasudhā' section consists of fifteen stotra-s. In the first stotra Umanandapañcakam consisting of five verses, the author offers salutation to his spiritual Guru Mahāyogī Swāmī Umānanda Saraswatī. The second one is Śrī-Gaṇeśapañcakam comprising of five verses and thereafter Śrī-Kṛṣṇasaptakam having seven verses followed by Śivapañcakam. The next stotra-s are Devīstuti-s titled Umāsaptakam in seven verses, Navadurgāstotram and Devīprasādapañcakam. The next one is a stotra called Malhārapañcakam, having five verses on God Malhāra of Jejurī temple. (This temple is located in Jejurī in the South-east part of the Pune city). The next one Sāmarthyāṣṭakam is a Viṣṇustuti consisting of eight verses which is followed by Rakṣāsaptakam. The Daśāvatārastotra is a beautiful description of the ten avatāra-s of Lord Viṣṇu. Nadistotra-s comprise of prayers to the holy rivers Gangā, Yamunā,Brahmaputrā, Narmadā, Godāvarī, Kṛṣṇā, and Kāverī.

The second section is 'Praśastikāvyam'. In this section, seven compositions are eulogizing important personalities like Lokamānya Tilak, Naṭavarya Prabhākara Paṇaśīkara, Dr. Sandhyā Purecā, Dr. Gaurī Māhulīkara, Dr. Mañjūṣā Gokhale, Srī Navalaseṭh Godrej and Smt. Rekhā Ajay Pāṇde. All the above mentioned compositions stand testimony to the inherent talent of the author in composing poems with beautiful rhythm and tempo.

The third section "Bālagītāni' consists of five verses. These five verses are intended for kids which are very meaningful and thoughtful.

The fourth section titled as 'Kāvyasudhā' consists of thirty poems. The first poem 'Bhāgyam Me Bhāratam' is a beautifully composed patriotic song. Through the next poem the author has shown due respect to his own Educational Institution 'Amrita Vishwa Vidyapeetham, in a charming way. Prakṛtipurusasamvāda is worth-reading. The next verse "Gāndhāryāḥ Manogatam' is really a heart touching poem in which the author firmly admits and supports the words of Manu: 'yatra nāryastu pūjyante ramante tatra devatāḥ / yatraitāstu na pūjyante sarvāstatrāphalāḥ kriyāh //' (where women are honored divinity blossoms there and where women are dishonored all action, no matter how noble, remain unfruitful) through the following verse: 'apamānaḥ sadā nāryā yatra yatra bhavet khalu / asaukhyam apakirtiśca vaṁśanāśaḥ suniścitaḥ//' The next few verses touch upon the importance of sincere friendship, the daily routine to be observed by the growing children, the names of months and their corresponding Ṛtu-s, significance of Yoga are really informative and useful gems which can be included in our school curriculum to have a broader outlook and perspective of our Indian culture. The poems dealing with Vṛtta-s - Vasantatilakā, Mandākrāntā, Śikhariṇī, Pṛthvī and Śārdūlavikrīḍitam are really informative and interesting.

The Last portion Chandodevādisaṁgraha is on the Devatā-s Indraḥ, Agniḥ, Soma, Aśvinī, Uṣas, Varuṇaḥ, Bṛhaspati, Savitṛ, Viṣṇu and Rudra, their positions, their respective Rṣi-s etc. The synonyms of these Devatā-s given at the end are very useful verses which readers may even tempt to memorize.

In short, the work 'KĀVYAŚRĪḤ' is an excellent product of a genius Vidyāvācaspati Srīhariḥ. It clearly exhibits his poetic talent in writing Sanskrit poems and undoubtedly is a valuable contribution to the field of Sanskrit literature.

I am sure that this new addition to Sanskrit literature will be wholeheartedly received by all those who are interested in poetry in general and Sanskrit poetry in particular. Let the Almighty bless Śrī Śrīhari Vāsudeva Gokarṇakara to compose many such valuable poems which will ultimately result in the enormous enrichment of Sanskrit language.

Thiruvananthapuram,
11/11/2019
P. VISALAKSHY

## हार्दम् अभिनन्दनम् |



डॉ. मञ्जूषा गोखले

कविवरेण श्रीहरिणा विरचिता इयं 'काव्यश्रीः' मया वारं वारं पठिता आस्वादिता च | प्रथमत: हार्दम् अभिनन्दनम् कविवर्ये श्रीहरिमहोदये वितीर्यते मया | अयं कविवर: मम विद्यार्थी इति कथने धन्यता खलु अनुभूयते मया | श्रीः नाम सौन्दर्यम् | श्रीहरिकवे: इयं काव्यश्रीः सत्यमेव सौन्दर्यवती, अत: समीचीनमेव इदम् काव्यसङ्ग्रहस्य अभिधानम् |

भारतीयसंस्कृतिपरंपराम् अनुसृत्य कविना मङ्गलाचरणेन प्रारम्भ: कृत: | अनुष्टुप्-छन्दसा प्रस्तुते प्रास्ताविकेऽस्मिन् न केवलं गणेशादिदेवतावन्दनम्, अपि तु कौटिल्य:, शिवराय:, लोकमान्यतिलक:, तथा मातृभूमि: एते सर्वेऽपि वन्दिता: इत्यस्ति विशेष: | श्रोतृवृन्दवन्दने कवि: 'काव्यकन्थाप्रसारणार्थं' क्षमां याचते, किन्तु दोषास्पदम् एतद् इत्यहं मन्ये, यत: न इयं काव्यकन्था, अपि तु काव्यरूपं क्षौमदुकूलम् इदम् इति मे मति: |

स्तोत्रसुधा, प्रशस्तिकाव्यं, बालगीतानि, काव्यसुधा इत्येतै: विभागैः इयं काव्यश्री: शालते, यथा कामिनी लावण्यमयै: अङ्गैः | शिवेतरक्षति: इत्यपि विद्यते अन्यतमं काव्यप्रयोजनम् | तदेव 'स्तोत्रसुधा'विभागेन संपद्यते | तत्र उमानन्दगुरुस्तोत्रं श्रीमदाद्यशङ्कराचार्याणां स्तोत्रविशेषाणां गणेशपञ्चकस्तोत्रं, श्रीमद्वल्लभाचार्याणां मधुराष्टकस्य, तथैव दशावतारस्तोत्रं जयदेवकवे: स्मारणं कुर्वते | यमुनालहरीकाव्यम् अनायाससाधितै: अनुप्रासैः अतीव रमणीयं प्रतिभाति | श्रीकृष्णपञ्चकम्, शिवपञ्चकम्, तथा देवीप्रसादपञ्चकम्, यमुनालहरी एतानि स्तोत्राणि यमक-अलङ्कारेण सुशोभितानि, यथा - 'हे भयङ्कर हेऽभयङ्कर हे जयङ्कर पाहि माम् |' तथैव - 'स देवीप्रसाद: सुलब्धो नतेन | स देवीप्रसाद: सुलब्धो न तेन |' नदी नाम कवे: प्रीतिविषय: इति वक्तुं शक्यं, यत: गङ्गा-यमुना-नर्मदा-नदीनां स्तोत्राणि अस्मिन् सङ्ग्रहे विशेषरूपेण राजन्ते |

द्वितीय: विभाग: अस्ति प्रशस्तिकाव्यम् इति | श्रीहरिकवि: विनीतभावेन नैकान् पूज्यपादान् सूक्तिकुसुमाञ्जलिसमर्पणेन वन्दते | लोकमान्यतिलकमहोदया:, नटवर्या: पणशीकरमहोदया:, नवलगोदरेजमहाभागा: तथैव कवे: अध्यापका: अत्र प्रणामभाज: |

बालगीतविभागे विरचितानि गीतानि अतीव रमणीयानि बालानां मनोरञ्जनाय योग्यानि च । तेषु वर्षागीतं ध्वन्यनुरणनेन बहु मधुरं प्रतिभाति । वृक्षगीतं परोपकारस्य महत्त्वं पाठयति ।

काव्यसुधाविभागे 'भाग्यं मे भारतम्' इति काव्यं कवेः राष्ट्रभक्तिं प्रत्याययति । 'गान्धार्याः मनोगतम्' इति दीर्घकाव्यं करुणरसपरिपोषात् रसिकजनचित्तं द्रावयेत् इति निश्चितम् । तस्मिन् नारीविषयका इयम् उक्तिः सर्वैः सुष्ठु अवधारणीया -

अपमानः सदा नार्याः यत्र यत्र भवेत् खलु ।
असौख्यमपकीर्तिश्च वंशनाशः सुनिश्चितः ॥

अद्यतने काले वाचनसंस्कृतेः अधोगतिः ज्ञायते एव सर्वैः । 'वाचनपञ्चकम्' इति काव्ये कविः 'छात्रो वाचनमाश्रयेत्' इत्येतैः शब्दैः छात्राणां हृदयानि वाचनार्थं प्रेरयति । 'प्रकृतिपुरुषसंवादः' इत्येतद् अभिनवं काव्यं 'वात्सल्येन हि लभ्यन्ते सुखं सिद्धिर्यशः सदा' इति सिद्धान्तं प्रतिष्ठापयति । प्रहेलिका तथा समस्यापूर्तिः नाम संस्कृतकाव्यस्य विशेषद्वयम् अस्मिन् सङ्ग्रहस्य शोभां द्विगुणीकुर्वन्ति ।

अस्य काव्यसङ्ग्रहस्य अन्तिमः भागः 'छन्दोदेवादिसङ्ग्रहः' कवेः छन्दोरचनानैपुण्यं प्रदर्शयति । छात्राणां कृते महत्त्वपूर्णः अयं विभागः सुलभः, सुकरः, रञ्जनीयः च । श्रीहरिकवेः इयं गीर्वाणवाणी सकलरसिकचेतोहारिणी खलु । यथा 'मधुराधिपतेरखिलं मधुरं' तथैव 'श्रीहरिकवेरखिलं मनोहरम्' इति वक्तुं शक्यं समीचीनं च ।

काव्यशास्त्रज्ञेन मम्मटाचार्येण प्रतिपादितं यत् काव्यस्य मौलिभूतं प्रयोजनं नाम 'विगलितवेद्यान्तरम् आनन्दम्' । तस्यैव आनन्दस्य अलौकिकी अनुभूतिः मह्यं प्रदत्ता अनया काव्यश्रिया । सर्वेऽपि सहृदयाः वाचकाः स एव आनन्दः अनुभविष्यन्ति इत्यत्र नास्ति शङ्कालेशः । पुनरेकवारं हार्दम् अभिनन्दनं तथैव आगामि-काव्यसङ्ग्रहस्य कृते शुभाशंसाः ।

डॉ. मञ्जूषा गोखले,

मुम्बई.

१९.११.२०१९

## ।। पुरोवाक् ।।

कविराज नमस्तुभ्यं काव्यानन्दसहोदर ।
काव्येन विस्मृतं दु:खं प्राप्तं च नवयौवनम् ।।

किञ्चिद्वा प्रयोजनमस्त्येव काव्यस्य यथा प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते । अत: किमस्ति काव्यप्रयोजनम्? काव्यप्रकाशे मम्मटनोक्तम् 'काव्यं यशसे व्यवहारविदे शिवेतरक्षतये । सद्य: परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ।।' सुविख्यातमिदं विश्वनाथस्य वचनं साहित्यदर्पणे (१.२) यत् 'चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि । काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।' भामहेनापि उक्तं काव्यालङ्कारे यत् 'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।।' वक्रोक्तिजीविते कुन्तेनोक्तं (१.७) 'शब्दार्थौ सहितौ वाक्यं कविव्यापारशालिनी । बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।'

किमस्ति काव्यमिदम्? भामहेनापि उक्तं 'शब्दार्थौ सहितौ काव्यम् ।' विश्वनाथेनोक्तं (१.३) 'वाक्यं रसात्मकं काव्यम् ।' तथा च विलियम्सवर्ड्स्वर्थमहाभागस्यापि व्याख्येयं विख्याता सर्वत्र यत् **"Poetry is the spontaneous overflow of powerful feelings: it takes its origin from emotion recollected in tranquillity"**

किमस्ति काव्यस्वरूपम्? साहित्यशास्त्रानुसारं काव्यं त्रिस्वरूपकं यथा गद्यं पद्यं मिश्रं च । यथा काव्यादर्शे (१.११) दण्डिनोक्तम् 'पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् ।' एतेषु पद्यकाव्यस्य माहात्म्यं तु सर्वैः ज्ञायते एव संस्कृतशास्त्रकारैरपि । अत एव अखिलसंस्कृत-वाङ्मयजगत् पद्यमाध्यमेन चकास्ति । कथं जायते काव्यमिदम्? काव्यरचनायाः कृते किमस्त्यावश्यकम् ईदृशां प्रश्नानामुत्तराणि प्राप्यन्तेऽस्माभिः नैकेषु ग्रन्थेषु । मम्मटेनोक्तं काव्यस्य एक एव हेतुः न हेतवः स एव शक्तिनिपुणताभ्यासम् ।

यद्यपि उच्यते यत् 'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा । कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ।।' तथाप्यत्र नास्ति शङ्का यत् शक्तिस्तु बीजमाध्यमेन मनुजमनसि तिष्ठत्येव । विविधशास्त्राणामध्ययनेन निपुणताप्रात्यर्थं यत्ना: करणीयाः। अभ्यासेनैव काव्ये प्रागल्भ्यं प्राप्तुं शक्यते । साहित्यशास्त्रस्य परम्परायां मम्मटादारभ्य विश्वनाथपर्यन्तं कतिचनग्रन्थानामध्ययनं साम्प्रतकाले नैकेषु विद्यापीठेषु प्रचलति । कोऽयं रसः कोऽस्ति

रससिद्धान्तः आदीनां विषयानां ज्ञानार्थं मम्मटरचितः काव्यप्रकाश इति ग्रन्थः छात्रैः सर्वत्र पठ्यते । तत्र काव्यस्य गुणदोषा अपि प्रकीर्तिताः। नाटकादि रूपकं कीदृशं भवेत् तदर्थं धनञ्जयरचितं दशरूपकम् तथा अलङ्कारविषयार्थं भामहस्य काव्यालङ्कारः इत्यादयः। किन्तु यः एतेषां सर्वेषां ग्रन्थानां मूलस्रोतः इति उच्यते स महान् ग्रन्थोऽस्ति भरतमुनिविरचितं नाट्यशास्त्रम् । विषयानेतानुद्दिश्य छात्राः नाट्यशास्त्रं पठन्ति वा न वा इति चिन्ताविषयः। अत: भरत: काव्यविषये किं वदति इति चिन्तनीयः बिन्दुः अत्र । तस्मात्पूर्वं काव्यम् इति शब्दस्य व्युत्पत्तिमन्यार्थांश्च पश्यामः।

'कु शब्दे' इति अदादिधातु: तथा 'ओरावश्यके ३.१.१२५' इति पाणिनिसूत्रेण ण्यत् प्रत्ययः अनयोः साहचर्येण काव्यमिति शब्दस्य व्युत्पत्ति: भवति । कवेः अपत्यमिति काव्यम् । य: काव्यं जनयति सः कविः । कविः इति शब्दोऽपि व्युत्पद्यते उणादिकोषे यथा 'अच इः (४.१४०)' इति उणादिसूत्रेण साध्यते कविः। कौति शब्दयति उपदिशति स कविः मेधावी विद्वान् क्रान्तदर्शनो वा स्त्रियां कवी (कृदिकारादक्तिनः अ. ४.१.४५' इति गणसूत्रेण वा ङीष् ) । काव्य इति भिन्नार्थकः शब्दोऽयं त्रिष्वपि लिङ्गेषु विद्यते । यथा मेदिन्यां (११३.११) 'काव्यं ग्रन्थे पुमान् शुक्रे काव्या स्यात् पूतनाधियोः।' ग्रन्थसम्बन्धे सति काव्यम् इति क्लीबे वर्तते । दैत्यगुरुः शुक्राचार्यः काव्यः इति पुंशब्देन ख्यातः। अपि च स्त्रियां काव्या इति पूतनाधियोः दृश्यते । अमरकोषेऽपि (१.३.२४) 'शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।' इत्यत्र स्पष्टं भवति यत् दैत्यगुरुः शुक्राचार्यः काव्यः कविश्च नाम्ना विदितः । अमरकोषस्य रामाश्रमीटीकायां काव्यः इति शब्दविषये भानुजीदीक्षितः वदति यत् कोतुमवश्यम् आख्यातुम् अर्हत्वात् काव्यः। (कुर्वादिभ्यो ण्यः। ४.१.१५१ इति वा ।)

काव्यप्रसवार्थं भिन्नशास्त्राणां ज्ञानमावश्यकमेव । यथा काव्यालङ्कारे (१.९) भामहेनोक्तम् 'शब्दश्छन्दोभिधानार्था इतिहासाश्रयाः कथाः । लोको युक्तिः कलाश्चेति मन्तव्या काव्यवैखरी ।।' काव्यप्रकाशस्य व्याख्यायां 'लोकस्य स्थावरजङ्गमात्मक-लोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां काव्यानां च महाकविनिबन्धानाम्, आदि-ग्रहणादितिहासादीनां च विमर्शनाद् व्युत्पत्तिः ।'

काव्यस्य सुचारुत्वं निर्दोषत्वं च स्पष्टीकृतमेव । यथा काव्यालङ्कारे (१.११), 'सर्वथा पदमप्येकं न निगाद्यमवद्यवत् । विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते ।।' तत्रैवोक्तं,

'नाकवित्वमधर्माय व्याधये दण्डनाय वा । कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः।।' काव्यमीमासायां द्वादशे श्लोके राजशेखरेणोक्तम् यत् 'वरमकविः न पुनः कुकविस्स्यात् । कुकविता हि सोच्छ्वासं मरणम् ।।'

**अधुना भरतमुनेर्मतं पश्यामः।** चतुर्दशे अध्याये वाचिकाभिनयस्य महत्त्वं कथयता भरतमुनिनोक्तम् 'वाचि यत्नस्तु कर्तव्यो नाट्यस्येषा तनुः स्मृता । अङ्गनेपथ्यसत्वानि वाक्यार्थं व्यञ्जयन्ति हि ।।१४.२।। वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च । तस्माद्वाचः परं नास्ति वाग्धि सर्वस्य कारणम् ।।१४.३।।' अत्र भरतः वाचिकाभिनये वाग्रचनायाः कृते व्याकरणं मुखे स्थापयति वदति च 'आगमनामाख्यातनिपातो-पसर्गसमासतद्धितैर्युक्तः। सन्धिवचनविभक्त्युपग्रह-नियुक्तो वाचिकाभिनयः।।१४.४।। द्विविधं हि स्मृतं पाठ्यं संस्कृतं प्राकृतं तथा । तयोर्विभागं वक्ष्यामि यथावदनुपूर्वशः ।।१४.५।।'

अत्र भरतमुनेः उद्दिष्टं केवलं नाट्याश्रितं न, तर्हि निखिलं काव्यजगत् । यतः संस्कृतवर्णानां स्पष्टीकरणादनन्तरं सः स्पष्टतया लिखति यत् व्याकरणं विज्ञाय किं करणीयं तर्हि 'काव्यरचना' । यथा - 'इत्थं व्यञ्जनयोगैः स्वरैश्च साख्यातनामपदविहितैः । काव्यनिबन्धाश्च स्युर्धातुनिपातोपसर्गैस्तु ।।१४.२३।।' कीदृशाः काव्यनिबन्धाः? तर्हि पदबन्धाः नाम निबद्धबन्धाः चूर्णाः वा । यथा - 'एभिः शब्दविधानैर्विस्तारव्यञ्जनार्थ संयुक्तैः । पदबन्धाः कर्तव्याः निबद्धबन्धास्तु चूर्णा वा ।। १४.४० ।।' अत्र स्पष्टमस्ति यत् पदैः रचितं काव्यं द्विविधम् । निबद्धं नाम पद्यकाव्यं तथा चूर्णं नाम गद्यकाव्यम् । पद्यकाव्यस्य गद्यकाव्यस्य च विश्वनाथस्य व्याख्या सर्वश्रुतैव । यथा 'वृत्तगन्धोज्झितं गद्यम् । छन्दोबद्धमिदं पद्यम् ।' किन्तु अत्र भरतस्य व्याख्याऽपि महत्त्वपूर्णा अध्ययनीया च । किमस्ति चूर्णपदं नाम गद्यकाव्यम्? स वदति 'अनिबद्धपदं छन्दोविधानानियताक्षरम् । अर्थापेक्ष्यक्षरस्यूतं ज्ञेयं चूर्णपदं बुधैः ।। १४.४२ ।।' यत्र छन्दो-विधानमनुसृत्य नियताक्षराणि न सन्ति तथा छन्दोभिः निबद्धमपि नास्ति । यत् अर्थापेक्ष्यक्षरस्यूतं वर्तते तत् चूर्णपदं गद्यकाव्यं वेति उच्यते । अभिनवगुप्ताचार्यः अभिनवभारतीनाम्नीटीकायाम् अर्थापेक्ष्यक्षरस्यूतविषये वदति 'अर्थः शृङ्गारवीरादिः तत् अपेक्ष्यक्षराणि परिमितानि भूयांसि वा, स्यूतानि यत्रेति असमाससंघट्टनात्मकम्

उक्तमिति । इदं तु केवलं पठनकर्मत्वात् गद्यम् इति उच्यते ।' पठनं मुखेन भवति अतः उक्तं मुखं व्याकरणं स्मृतम् । अनन्तरं पद्यकाव्यविषये भरतः (१४.४३) वदति 'निबद्धाक्षरसंयुक्तं यतिच्छेदसमन्वितम् । निबद्धं तु पदं ज्ञेयं प्रमाणनियतात्मकम् ।।' यत् छन्दोभिः निबद्धं विशिष्टाक्षरैः संयुक्तं यतिः नाम विरामः । अभिनवगुप्तः वदति 'अत्र छेदः नाम तत्कृतः विरामकृतः पदविभागः। पादसंख्यया सामान्यलक्षणमाह प्रमाणनियतात्मकं नाम प्रमाणेन श्रोत्रेन्द्रियेण नियत आत्मा यत्र, श्रव्यम् इत्यर्थः ।' ईदृशं पद्यकाव्यं भवति । अत्र स्पष्टं यत् व्याकरणादनन्तरं भरतः छन्दोविधानं कथयति । पद्यते अग्रे गच्छति इति पद्यम् । छन्दांसि काव्यम् अग्रे नयन्ति, अतः सूक्तमेव पाणिनीयशिक्षायां यत् 'छन्दः पादौ तु वेदस्य ।' यत् चम्पूकाव्यं तत्तु गद्यपद्यमिश्रितमेव इत्यत्र नास्ति शङ्कालेशः। पद्यरचनायां छन्दसाम् ईयत् महत्त्वं यत् भरतः तदनुसृत्य अध्यायद्वयं विरचयति । छन्दःकौस्तुभे (१.४) तु सूक्तमेव हि यत् 'छन्दोलक्षणहीनं सभासु काव्यं पठन्ति ये मनुजाः। कुर्वन्तोऽपि स्वेन स्वशिरश्छेदं न ते विद्युः ।।' दण्डिनोक्तं काव्यादर्शे (१.१२) यत् 'सा विद्या नौर्विविक्षूणां गम्भीरं काव्यसागरम् ।' छन्दोविद्या एषा गम्भीरं काव्यसागरं प्रवेष्टुम् इच्छतां सर्वेषां कृते नौः इव अस्ति ।

नाट्यशास्त्रं प्राचीनम् अपि च नूतनप्रयोगाय अनुमतिं न ददाति इत्युच्यते कैश्चित्। यथा 'गायत्रीप्रभृतिस्त्वेषां प्रमाणं संविधीयते । प्रयोगजानि सर्वाणि प्रायशो न भवन्ति हि ।।१४.७६।।' तथा च 'सन्त्यन्यान्यपि वृत्तानि यान्युक्तानीह पण्डितैः । न च तानि प्रयोज्यानि न शोभां जनयन्ति हि ।।१५.१६१।।' यद्यपि एवं तथापि भरतेन उक्तं 'छन्दसां तु तथा ह्यते भेदाः प्रस्तारयोगतः। असंख्येयप्रमाणानि वृत्तान्याहुरतो बुधाः ।।१४.७५।।' उक्तातः सुप्रतिष्ठापर्यन्तं त्रयोदशकोटिः द्विचत्वारिंशल्लक्षं सप्तदशसहस्रं सप्तशतं षड्विंशतिः (१३,४२,१७,७२६) समवृत्तानामेव संख्या कथिता (१४.८१ तः १४.८३) । अपि च पञ्चदशाध्यायस्य अन्तिमे श्लोके भरतः काव्यनिर्माणसमये नूतनवृत्तप्रयोगाय अनुमतिमपि यच्छति । यथा 'वृत्तैरेवं तु विविधैर्नानाछन्दसमुद्भवैः । काव्यबन्धास्तु कर्तव्याः षट्त्रिंशल्लक्षणान्विताः ।।१५.१९७।।' तथा च एकविंशत्यध्यायेऽपि 'न शास्त्रप्रभवं कर्म तेषां हि समुदाहृतम् । आचार्यबुद्ध्या कर्तव्यमूहापोहप्रयोजितम् ।।२१.२१७।।' अत्र स्पष्टं यत्

शास्त्रं तु प्रयोगाय एव । व्याकरणं छन्दोविधानं तदनन्तरं भरतः काव्यस्य त्रिंशत् लक्षणानि अलङ्कारान् काव्यदोषान् तथा काव्यगुणान् कथयति । काव्यगुणाः यथा 'श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पादसौकुमार्यम् । अर्थस्य च व्यक्तिमुदारता च कान्तिश्च काव्यस्य गुणा दशैते ।।१६.९७।।'

अनन्तरं स कथयति यत् काव्यरचनायै रसानुसारम् उदारमधुरशब्दाः प्रयोक्तव्याः । यथा - 'यच्छन्दः पूर्वमुद्दिष्टं विषमार्धसमे समम् । उदारमधुरैः शब्दैस्तत्कार्यं तु रसानुगम् ।।१६.१२२।।' अन्तिमे श्लोके (१६.१२३) च उदारमधुरैः भूषिताः कवीनां काव्यबन्धाः राजहंसैः विकसिताः पद्माकराः इव शोभन्ते । यथा -

'शब्दानुदारमधुरान् प्रमदाभिधेयान्
नाट्याश्रयासु कृतिषु प्रयतेत कर्तुम् ।
तैर्भूषिता भुवि विभान्ति हि काव्यबन्धाः
पद्माकरा विकसिता इव राजहंसैः ।।'

यथा पूर्वोक्तं यत् काव्यस्य मुख्यप्रयोजनमस्ति 'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।' कदा एतत् भवितुं शक्यते? काव्यं सुबोधं भवति चेदेव । अत एव अभिनवगुप्तेनोक्तं यत् 'न काव्यं शास्त्रवदुपदेश्यं किञ्चित् कश्चित् जानीयादिति प्रवर्तते ।' (नाट्यशास्त्रम् १६.९१)

**काव्यसृजनस्य द्वादशानुभूतनिमित्तानि प्रस्तूयन्तेऽधुना ।**

**गुरुं च भरतं नत्वा सर्वांश्चैव कवीश्वरान् ।**
**प्रस्तौमि च निमित्तानि द्वादश काव्यनिर्मितेः ।।**
**एतत्तु मे मतं चास्ति भिन्नं प्रायः भवेच्च वः ।**
**स्वानुभवेन प्रस्तौमि रसिकाः शरणं मम।।**
**कथं भवति काव्यस्य प्रसूतिर्जन्म निर्मितिः ।**
**प्रेरणामूलकं काव्यं तयैव सिध्यते परम् ।।**
**कदाचित्स्फुर्यते काव्यं प्रासङ्गिकं भवेत्तथा ।**
**स्वाध्यायेन कदाचिच्च स्वाध्यायानन्तरं तथा ।।**
**समाजदर्शनायैव स्वेच्छया वा परेच्छया ।**
**स्पर्धायै रच्यते काव्यं सचित्रकं भवेत्तथा ।।**

**सरलपठनायैव कदाचिच्च यथालयम् ।**
**सूचितं च भवेत्काव्यं सदृशं द्वादशं खलु ।।**

**काव्यसृजनस्य द्वादश निमित्तानि ।**

**१) काव्यस्फुरणम् -** काव्यं तु स्फुर्यते एव । स्फुरणसमये छन्दोनिश्चितिर्न भवति । काव्यं सलयमेव प्रकटीभवति । यथा - वर्षाकालः, भाग्यं मे भारतम् , अमृताविश्वविद्यापीठम् । कदाचिद्विशिष्टछन्दस्यपि रचनाः भवन्ति । तत्र प्राथमिकस्तरे बहुधा आदौ विशिष्टछन्दोलये कृतिः भवति तदनन्तरं छन्दोनियमाननुसृत्य शब्दाः युज्यन्ते । यस्तु रसछन्दःसिद्धः कवीश्वरः तस्य मुखात् साक्षात् सरस्वती छन्दोरूपं धारयित्वा प्रकटीभवति तत्र नैव शङ्कालेशः ।

**२) यथाप्रसङ्गम् -** प्रसङ्गमनुसृत्य काव्यरचना भवति । यथा विवाहः, उत्सवः, आनन्दः, दुःखम्, विरहः इत्यादयः । मुम्बईविद्यापीठस्य संस्कृतविभागस्य प्रमुखरूपेण कार्यं कुर्वत्याः डॉ. गौरी माहुलीकरमहाभागायाः सेवानिवृत्तिसमये रचितं काव्यं 'गौरीस्थिता हि माधुरी' अथ वा विवाहप्रसङ्गे सति शुभाशयदानार्थं रचितम् इदम् 'अपूर्वानचिकेतसौ' । सरलज्ञानार्थम् अपि च सत्वररचनार्थं कविः स्वसामर्थ्येन यथास्फुर्ति वृत्तं चिनोति ।

भिन्नवृत्तानामपि चयनं भवति, यथा - रेखासप्तकम् इति । काव्यमिदं स्रग्धरा, भुजङ्गप्रयातम्, अनुष्टुभ् चैतेषु वृत्तेषु रचितमस्ति । रेखामहोदया सम्प्रति उदयाचलविद्यालयस्य प्राचार्या अस्ति या मातृरूपेण विराजते । तस्याः जन्मार्धशताब्दिप्रसङ्गमनुसृत्य रचितमस्तीदं काव्यम् ।

**३) अध्ययनपूर्णम् -** अस्माभिः सर्वैः स्वजीवने इदम् उपनिषद्वाक्यम् अनुचर्यते सदैव यत् स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम् इति । अत्र स्वाध्यायः च प्रवचनं च एतयोः समाहारः भवितुमर्हति स्वाध्यायप्रवचनम् इति । स्वाध्यायानन्तरं प्रवचनं तथा प्रवचनानन्तरं पुनः स्वाध्यायः शृङ्खलेयं तत्त्वबोधाय आवश्यकी । कविः कस्यचिद्विषयस्याध्ययनं करोति तदा अध्ययनादनन्तरं स तं विषयं काव्ये रचयितुमिच्छति । यथा - नदीस्तोत्रम् । सर्वैः श्लोकोऽयं ज्ञायते यत् 'गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ।।' एताः नद्यः महत्त्वपूर्णाः संस्मरणीयाः रक्षणीयाः एव । किन्तु

भारते अन्या: अपि नद्य: सन्ति यथा शोणा, कृष्णा, तापी इत्यादय: । वङ्गदेशे जमुना इति अन्या एका नदी वर्तते । अत: कविना चिन्तितं यत् सर्वासां नदीनां नामानि यत्र भवेयु: तादृशं काव्यम् आवश्यकम् । अत: रचितं नदीस्तोत्रम् ।

४) **स्वाध्यायानन्तरम्** - कदाचित् कवि: प्रथमं विषयं संस्मरति तदनन्तरं तद्विषये अध्ययनं कृत्वा काव्यरचनां करोति । यथा - नवदुर्गास्तोत्रम् ।

५) **समाजदर्शनम्** - काव्यं समाजस्य प्रतिबिम्बमिव । समाजे घटितैः प्रसङ्गैः काव्यस्य प्रसूति: भवति । यदि आह्लाददायिनी वार्ता तर्हि तादृशं काव्यं सृज्यते, दु:खदायिनी वार्ता चेत् तादृशं काव्यं रच्यते । यथा - जानेवारी मासस्य द्वितीये दिनाङ्के महाराष्ट्रे भीमाकोरेगांव इत्यत्र मराठा तथा दलितजना: एतेषु महत्संघर्षो जात: । तेन सामान्यजना: त्रस्ता: पीडिताश्च । सङ्घर्षाग्निरयं न केवलं महाराष्ट्रे अपि तु सम्पूर्णदेशेषु दावाग्निरूपेण प्रसृत: । तदा देशेषु प्रजासत्ताकदिननिमित्तं कार्यक्रमस्य आयोजनं प्रचलति स्म । तदा मनसि ये विचारा: स्फुरिता: त एव काव्यबद्धा: 'कीदृशं देशवन्दनम्?' इत्यस्मिन् काव्ये ।

६) **इच्छा** - कदाचित् कवि: स्वेच्छया परेच्छया वा काव्यं रचयति । तदर्थं पूर्वमेव स: वृत्तचयनं करोति । विषयानुसारं ज्ञानं सम्प्राप्य काव्यगुणान् अलङ्कारान् स्वकाव्येषु योजयति । अभ्यासेन पुन:पुन: पठनेन स दोषान् निराकृत्य शुद्धं काव्यं रचयति । यथा - 'नटवर्यसप्तकम्' ।

**अ) स्वेच्छया** = महाराष्ट्रे नाट्यक्षेत्रे कोऽयं जन:, य: श्रीप्रभाकरपणशीकरमहोदयं न जानाति? नाट्यक्षेत्रे तस्य योगदानं महत्तमं खलु । अत: कविना चिन्तितं यत् महोदयमनुसृत्य किमपि लेखनीयम् । रचनायै विषयज्ञानमत्यावश्यकम् । अत: पणशीकरमहोदयस्य कन्यया तरङ्गिणीभगिन्या सह वार्तालापेन पठनेन च किञ्चिदधिकं ज्ञात्वा काव्यं रचितं तदेव 'नटवर्यसप्तकम्' । रचनायै पूर्वमेव स्रग्धरा भुजङ्गप्रयातमिति च वृत्तद्वयं सुनिश्चितम् ।

**ब) परेच्छया** = कदाचित् परेच्छयापि काव्यरचना भवति । यथा- डॉ. मञ्जूषागोखले-महोदयाया: आदेशानुसारं मङ्गलाष्टकस्य श्लोकद्वयं रचितम् । तदनन्तरं षट् श्लोकान् विरचय्य मङ्गलाष्टकं पूर्णं जातम् ।

अन्यत् उदाहरणमप्यत्र प्रस्तौमि । मनीषवाळवेकर: कंचित् विषयमनुसृत्य टिळक-महाराष्ट्रविद्यापीठे निबन्धं पठितुं ऐच्छत् । तदा तेन प्रार्थितं यत् एकं श्लोकं रचयतु इति। अपेक्षानुसारं तेन बिन्दव: नामावली च प्रेषिता । तदनुसारं रचितोऽयं श्लोक: ।

**शुष्काङ्गी कोमलाङ्गी मम सदनजना मण्डली ग्राहिणी या**
**दैवज्ञा सा चित्रकोला कटकगृहवरा लतिका ब्राह्मणी या ।**
**वृत्तिस्था मे प्रिया (मेऽप्रिया) या सरटबहुला संस्कृतिर्भारतस्य**
**छन्ना नित्या प्रतीकं मयि सुखवरदा हेमला मे च भूयात् ।।**

कश्चन कवि: स्वपत्नीविषये वदति इति प्रतिभाति । किन्तु अपरार्थ: निबन्धविषयं सूचयति सोऽयमस्ति गृहगोधिका इति ।

**७) स्पर्धा -** कदाचित् स्पर्धानिमित्तमपि काव्यरचना भवति । यथा - समस्यापूर्तिः ।

८) **यथाचित्रम् -** कदाचित् चित्रमनुसृत्य काव्यरचना भवति, स्वेच्छया परेच्छया वा । यथा - मे कृष्ण:, तव सौन्दर्यम्, हृत्प्रेम ।

**९) पठनार्थम् -** कदाचित् विशिष्टं काव्यं स्तोत्रं वा पठनार्थं सरलं न भवेत्प्रायः । अत: कवि: सारल्यभावेनैव पुना रचनां करोति । यथा - जयदेवरचितं दशावतारस्तोत्रं लालित्यपदेन विलसति निखिलजगति । किन्तु जनसामान्यानां कृते सरलपठनार्थम् अनुष्टुभि रचितमिदं दशावतारस्तोत्रम् ।

**१०) यथालयम् -** कदाचित् कस्यचित् गीतलयस्य मनसि एवं प्रभाव: वर्धते यत् नूतनं काव्यं तेन लयेन एव स्फुरति साक्षात् । यथा - प्रेमकथा अशक्या, रचयेम संस्कृतकवनम् इत्यादय: । कुत्रचिच्च नूतना काव्यनिर्मितिरेव जायते । यथा - दृष्टा शकटी सा, स्वापगीतम्, नम्यः शिवराजः इत्यादय:।

**११) गूढकाव्यम्** - कदाचित् काव्यं गूढमपि भवति । कवेः स्पष्टीकरणादनन्तरं रसिक: तस्यान्तं गच्छति । यथा -

‘धन्यवादान्प्रेषयामि रसास्वादगणं प्रति ।
यतो हि हर्षवर्षेऽस्मिन् हरिरष्टभुजंगत: ।।’

पञ्चैकशून्यद्वितमे वर्षे कवेर्गृहे बालकद्वयं जनिमलभत । तदा शुभेच्छावर्षया क्लिन्नेन आनन्दितमनसा कविना रचितः श्लोकोऽयम् । अन्यच्च -

'पिता समो हि व्यासेन पुत्रो गन्धर्वसदृशः ।
एषस्तु संगमो मन्ये न भूतो न भविष्यति ॥'

अत्र शङ्का वर्धते यत् व्यासस्य पुत्रः गन्धर्वः कथम् ? अत्र अर्थः अस्ति यत् पिता व्यासेन समः अस्ति संस्कृतरचनां करोति तथा पुत्रः गन्धर्वसदृशः गायति । मुम्बईसंस्कृतविश्वे एकोऽयं भावे परिवारः यत्र पितुर्नाम राजेन्द्रभावे तथा पुत्रस्य नाम श्रीरङ्गभावे इति ।

अपरं च -

'समीपे न द्वितीयायां प्रथमामाह्वयाम्यहम् ।
यद्यपि प्रथमा हस्ते द्वितीया हृदि संस्थिता ॥'

अत्र द्वितीया पत्नी एव प्रथमा तु सा संस्कृतविद्या ।

अन्यच्च - 'पाणिनेर्येऽभ्यासकाः ते जानन्त्येव तद्रसम् ।
पाणिनेर्ये खादकाश्च कथं जानन्ति तं रसम् ॥'

प्रथमा पङ्क्तिस्तु स्पष्टैव किन्तु 'पाणिनेः खादकाः' इति न ज्ञायते । स्पेनदेशे पाणिनिनामा कश्चन खाद्यपदार्थः अस्ति । तं ये खादन्ति ते पाणिनेः अष्टाध्यायीरसं कथं जानीयुः इति भावः ।

१२) **सदृशकाव्यम् -** कस्यचित् कवेः काव्येन प्रभावितः अन्यः कविः तत्सदृशः नूतनं काव्यं रचयति, यथा - ठण्ठण् पपम्पम् छछ्छछ्ञ् टटण्टः । अपरं च, सर्वैः ज्ञायते एव यत् आदिशङ्कराचार्येण कैवल्याष्टकम् लिखितमस्ति । तेन प्रेरितः भूत्वा कविना प्राप्तयोः कैवल्यसामर्थ्यौ इति बालकयोः सतोः एव कैवल्याष्टकसदृशमेव सामर्थ्याष्टकं विरचितम् । अस्मिन् स्तोत्रे कवेः मानसिकस्थितिमपि ज्ञातुं शक्यते ।

यद्यपि एतानि द्वादश निमित्तानि तथापि सर्वत्र एकं समानसूत्रं दृश्यते तदस्ति प्रेरणा । अतः काव्यनिर्मित्यै प्रेरणा अतीव महत्त्वपूर्णा । अतो वदामि,

**प्रेरणामूलकं काव्यं** शक्तिदं स्फूर्तिदं भवेत् ।
सिद्धिदं बुद्धिदं काव्यं नित्यं भूयाच्च भाग्यदम् ॥

***

## ।। प्रास्ताविकसुभाषितानि ।।

नमस्ते राजराजेन्द्र हेरम्ब गणनायक ।
त्वत्प्रसादेन श्रीर्विद्या कीर्तिर्बुद्धिश्च मे सदा ।। १ ।।

थेऊरस्थितविघ्नेशं रमामाधवदैवतम् ।
वन्दे चिन्तामणिं देवं क्लेशविघ्नोपशान्तये ।। २ ।।

सर्वेऽत्र कवय: सन्तु सर्वे सन्तु च लेखका: ।
गद्यपद्यमाध्यमेन सर्वै: स्तूयेत शारदा ।। ३ ।।

राज्यशास्त्रेऽर्थशास्त्रे च नीतिशास्त्रे स पण्डित: ।
कौटिल्यं विष्णुगुप्तं च चाणक्यं तं नमाम्यहम् ।। ४ ।।

अग्निनापि न दग्धानि नाटकानि त्रयोदश ।
पठने सुगमान्येव भासस्य सुगमा प्रभा ।। ५ ।।

महाविद्यालयं क्षेत्रं राज्यं राष्ट्रं जगत्तथा ।
व्यापृतं कालिदासेन सर्वेषां हृदयं सदा ।। ६ ।।

परनारीरक्षकोऽयं महाराष्ट्रस्य पालक: ।
परैर्नत: शिवाजि: स राजाऽभूल्लोकनन्दन: ।। ७ ।।

स्वातन्त्र्यं जन्मसिद्धो मे ह्यधिकारो भवत्ययम् ।
उद्धारायैव लोकानां लोकमान्येन गर्जितम् ।। ८ ।।

वीरभूमि: पूतभूमि: जननी गुणिनामियम् ।
विश्वस्यापि गुरुं देशं भारतं मे नमाम्यहम् ।। ९ ।।

ईश्वरो विषयो नैव धर्मस्य रे कदाचन ।
आस्थाविश्वासश्रद्धाभिर्भिन्नरूपेषु पूज्यते ।। १० ।।

नूतनानां कवीनां च समूहे समुपस्थित: ।
संस्थानं श्रोतृवृन्दांश्च नत्वा काव्यं पठाम्यहम् ।। ११ ।।

कथं प्राप्तं योजितं वा कष्टेन निर्मितं बहु ।
क्षमां याचे सभायां मे काव्यकन्थाप्रसारणम् ।। १२ ।।

## ।। स्फुटश्लोकाः ।।

मानवीयजीवनस्य चाधारः खलु संस्कृतम् ।
संस्कृतस्य सेवयैव कुर्मः संस्कृतिरक्षणम् ।। १ ।।

सिञ्चन्ति श्रमधाराभिः धान्यवैभवलब्धये ।
विश्वपोषणरता नित्यं श्रमदूताः कृषीवलाः ।। २ ।।

गृहे ते प्रतीक्षां च कुर्वन्ति दाराः
त्वयाऽगम्यमानेन हर्षंगतास्ते ।
विना त्वां कथं जीव्यमाना अतो हि
प्रवासे सुरक्षा सदा रक्षणीया ।। ३ ।।

आचार्याच्चरणो ग्राह्यो चरणस्तु स्वमेधया ।
कालेन चरणो लभ्यः शेषः सब्रह्मचारिभिः ।। ४ ।।

शस्त्राण्यपि च शास्त्राणि पूज्यन्ते दशमीतिथौ ।
तेषां तु सुप्रयोगेण निःशङ्कं विजयो ध्रुवम् ।। ५ ।।

दृष्ट्या वाचा लेखनेन साक्षाद्ज्ञानं भवेन्न हि ।
सुकृतं चेत्स्मर्यते हि एकलव्येन तद्यथा ।। ६ ।।

विचारैश्चिन्तनेनैव पाठेन पाठनादिभिः ।
चर्चयापि च विद्वद्भिः तत्त्वबोधोऽभिजायते ।। ७ ।।

एषा तु प्रतिभा नास्ति प्रतिभातीति भासते ।

पण्डितानां समूहेषु मूढो भवति पण्डित: ।। ८ ।।

विद्वांसो बहव: सन्ति मग्ना: शास्त्रेषु ये सदा ।

मूढं मत्सदृशं दृष्ट्वा मा कुरु करताडनम् ।। ९ ।।

धन्यवादा नान्यवादा: पुण्यवादा: कृता: वरम् ।

अतिरेको न काव्यस्य करणीय: कदाचन ।। १० ।।

## ।। गूढश्लोका: ।।

धन्यवादान् प्रेषयामि रसास्वादगणं प्रति ।

यतो हि हर्षवर्षेऽस्मिन् हरिरष्टभुजंगत: ।। १ ।।

समीपे न द्वितीयायां प्रथमामाह्वयाम्यहम् ।

यद्यपि प्रथमा हस्ते द्वितीया हृदि संस्थिता ।। २ ।।

पाणिनेर्येऽभ्यासका: ते जानन्त्येव तद्रसम् ।

पाणिनेर्ये खादकास्ते कथं जानन्ति तं रसम् ।। ३ ।।

पिता व्याससमो यस्य पुत्रो गन्धर्वसदृश: ।।

एषस्तु संगमो मन्ये न भूतो न भविष्यति ।। ४ ।।

पयोरसस्य चास्वादः चाये नैव च नैव च ।

तयैव शक्यते सख्या अतः सा चाधरे मम ।। ५ ।।

मातापि वैद्या च पुत्रोऽपि वैद्य:

एका अपूर्वा तथान्यस्त्वनन्य: ।

शब्दस्य सिद्धौ च कायस्य शल्ये

योग्यं हि तत्सार्थनाम द्वयोर्हि ।। ६ ।।

यस्य ज्ञानगभीरेण विनयादिगुणैः खलु ।
माधवः खलु विश्रान्तः श्रीहरिरपि विश्रान्तः
नारायणोऽपि विश्रान्तः तं वन्दे क्षीरसागरम् ॥ ७ ॥

## ॥ पर्यावरणरक्षणम् ॥

रक्ष मानव मां विश्वे नश्यमानो भवाम्यहम् ।
मे नाशश्चेत्तेऽपि नाशो दुःखं व्यक्तीकरोत्यलिः ॥ १ ॥
भयानकः कर्बवायुर्जीवसृष्टेश्च भक्षकः ।
तस्मात् कार्यं प्रयत्नेन पर्यावरणरक्षणम् ॥ २ ॥

## प्रजातन्त्रे मतमाहात्म्यम् ।

वृत्त - उपेन्द्रमाला । ज त र ग
(राजेन्द्रदातारमहोदयेन दत्तनामवृत्तम् ।)
यथाङ्क एकः परीक्षणे वै, यथैकधावः क्रिकेटखेले ।
तथैव चैकं मतं त्वदीयं, महत्वपूर्णं प्रजानुतन्त्रे ॥
यथा सुपुत्रः कुलाभिमानो, यथैकचन्द्रो निशातिशोभा ।
तथैव भूयात् तवैव नित्यं, मतं च ते सुप्रशासनाय ॥

## स कृष्णो हि कृष्णः।



विचारेषु सर्वेषु काये स कृष्णः
सुनेत्रे सुषुप्तौ सुचित्तेऽपि कृष्णः ।
ममैवाधुना नैव देहो विशेषो
जलप्रातिबिम्ब्यः स कृष्णो हि कृष्णः।।

## ।। नाट्यशास्त्रम् ।।

वेदेभ्यो रचितः पुरा भगवता ध्यानेन स ब्रह्मणा
सर्वेषां जनरञ्जनाय वरदो वेदोऽखिलः पञ्चमः ।
सर्वश्राव्यससङ्ग्रहो धृतिकरः कर्मानुसन्दर्शको
नाट्याख्यः सकलोपदेशजनको विश्रान्तिदायी सदा ।।१।।

आदौ प्रश्ना मुनीनां भरतमुनिकथा नाट्यनिर्माणकार्यं
शङ्का चेन्द्रस्य तेन शतसुतपठनं तुर्यवृत्तिप्रयोगः।
जाता देवाङ्गना हि ध्वजमहनटनं विघ्नसन्तापकार्यं
बद्धं नाट्याय गेहं सुरकुलनिहितं रङ्गपूजाविधानम् ।।२।।

------

## ।। स्तोत्रसुधा ।।

येन स्तुतिर्हि देवानां मानवानां च गीयते ।
मनःशान्तिश्च स्वास्थ्यं च स्तोत्रेणैव हि लभ्यते।।

### ।। श्रीउमानन्दपञ्चकम् ।।



सरस्वती मुखे यस्याः सिद्धिबुद्धिप्रदायिनी।
पापतापदुःखहर्त्रीम् उमानन्दं गुरुं भजे ।।१।।

महायोगिनी ह्येकमेवाद्वितीया
लसत्स्वामिनी योगपन्थानुगम्या ।
शिवानन्दवासः सुभाति सदा ते
उमानन्द मामुद्धर त्वं गतिर्मे ।।२।।

शिवंमार्गगम्या जपध्यानयोगैः
रता कुण्डलिन्याः सुशक्तौ च नित्यम् ।
मुखे राजते तत्प्रभा सात्त्विकी या
चिदानन्दशीला परब्रह्मरम्या ।।३।।

जटाभारशोभा महायोगलक्ष्मी:
सुहास्यानना भक्तदीक्षां ददाति ।
तया योगशक्त्या सुदैवं कृतं हि
महद्वन्दनीया उमानन्दवर्याः।।४।।

सदा भक्तरम्या सदा भक्तिगम्या
मुदा सर्वभक्तेच्छपूर्तिं करोति ।
सुसूक्ष्मादिरूपेण व्याप्तं च विश्वं
उमानन्दवर्ये नमः कोटिवारम् ।।५।।

।। इति श्रीहरिविरचितं श्रीउमानन्दपञ्चकं सम्पूर्णम् ।।

## ।। श्रीगणेशपञ्चकम् ।।

( वृत्तम् = पादाकुलकम् । )



वदनं वसनं वचनं वहनं नमनं शमनं गमनं दमनम् ।

तरणं वरणं हरणं करणं गणनायक ते निखिलं शरणम् ।। १ ।।

नृत्यं कृत्यं गोत्रं स्तोत्रं वाद्यं खाद्यं पाद्यं पानम् ।

ध्यानं ज्ञानं गानं दानं गणनायक ते निखिलं शरणम् ।। २ ।।

हस्तौ पादौ कर्णौ नाभिस्स्कन्धौ जिह्वा घ्राणं हृदयम् ।

उदरं नेत्रे शुण्डा दन्तौ गणनायक ते निखिलं शरणम् ।। ३ ।।

नीतिश्शुद्धी रीतिस्सिद्धिर्बुद्धिश्शक्तिर्युक्तिर्माया।

पुष्टिस्तुष्टिर्दृष्टिस्सृष्टिर्गणनायक ते निखिलं शरणम् ।। ४ ।।

भाले चन्द्रो हस्ते शूलः कण्ठे माला पादे पुष्पम् ।

अस्त्रं शस्त्रं पीतं वस्त्रं गणनायक ते निखिलं शरणम् ।। ५ ।।

।। इति श्रीहरिविरचितं श्रीगणेशपञ्चकं सम्पूर्णम् ।।

## ।। श्रीकृष्णसप्तकम् ।।

( वृत्तम् = चर्चरी । अन्यानि नामानि = हरनर्तनं विबुधप्रिया कुमुद्वती । प्रतिचरणं १८ अक्षराणि । )



योगनायक योगगायक योगदायक पाहि माम्
योगपावक दोषनाशक नन्दनन्दन रक्ष माम् ।
हे भयंकर हेऽभयंकर हे जयंकर पाहि माम्
हे नरेश्वर हे नटेश्वर हेऽनघेश्वर रक्ष माम् ।। १ ।।

वेदतारक वेणुवादक वेदनाहर पाहि माम्
सौख्यदायक दुःखहारक सृष्टिरक्षक रक्ष माम् ।
विश्वबालक विश्वपालक विश्वचालक रक्ष्यताम्
विश्वरञ्जक विश्वशोधक विश्वमोचक पायताम् ।। २ ।।

हे युगन्धर हे धुरन्धर हे नगन्धर रक्ष्यताम्
हे सुदर्शनचक्रधारिकवे सुनन्दन पायताम् ।
गोपवल्लभ गोपदुर्लभ गोपयोधर रक्ष माम्
गोपनन्दन गोपचन्दन गोमनोहर पाहि माम् ।। ३ ।।

कालियाधर कंसमारक पार्थबोधक मध्वरे

पापहारक तापनाशक पायतां वर भूपते ।

नर्तकोत्तम साधुसेवक मन्दहास्यलसद्वर

नीतिपण्डित तत्त्वविद्वर पायतां जनभूपते ॥ ४ ॥

पाण्डवप्रिय पाण्डवप्रिय गोधनप्रिय तुष्यताम्

देवकीवसुदेवनन्दन नन्दपुत्र सुगीयताम् ।

पाञ्चजन्यसुवादकप्रिय द्रौपदीधन रक्ष्यताम्

भारतीयसुसंस्कृतिप्रिय भारती मम दीयताम् ॥ ५ ॥

श्यामसुन्दर हास्यसुन्दर चित्तपावन लस्यताम्

सारथे जयदामिनीनवनीतचोर सुभुज्यताम् ।

पूतनायक पूतनाहन पूतनागर पूयताम्

यामिनीधन भामिनीवर कामिनीमद जीयताम् ॥ ६ ॥

भुक्तिदायक मुक्तिदायक शक्तिदायक माहरे ।

गोपतारक गोपिकेश्वर गोपनायक श्रीहरे ।

एहि माधव एहि केशव चित्तहारक रक्ष्यताम् ।

रुक्मिणीवर राधिकेश्वर गोकुले मम नन्द्यताम् ॥ ७ ॥

॥ इति श्रीहरिविरचितं श्रीकृष्णसप्तकं सम्पूर्णम् ॥

# ।। शिवपञ्चकम् ।।

( वृत्तम् = चर्चरी । अन्यानि नामानि = हरनर्तनं विबुधप्रिया कुमुद्वती । प्रतिचरणं १८ अक्षराणि । )



पार्वतीवर पार्वतीश्वर पार्वतीहर पाहि माम्
पार्वतीधन पार्वतीघन पार्वतीजन नन्द्यताम् ।
धीरसागर धीरनागर धीरनायक धीयताम्
वीरपूजित वीरसूचित वीरशंकर रक्ष्यताम् ।।१।।

आशुतोषण चाशुरोषण चाशुमोचन मुञ्च माम्
भस्मकाय कपालमाल पिनाकहस्त सुरक्ष माम् ।
त्र्यम्बकेश्वर हे त्रिलोचन हे त्रिविक्रम रक्ष्यताम्
हे लयङ्कर हे भयङ्कर हे त्रिशूलधराव माम् ।।२।।

हे सुरेश्वर हेऽसुरेश्वर हे स्वरेश्वर पायताम्
हे सदाशिव हे नटेश्वर हे महेश्वर नन्द्यताम् ।
शैलजावर शैलवासक शत्रुजिद्वर पाहि माम्
हे जटाधर हे नटेश्वर धूर्जटे नट रक्ष्यताम् ।।३।।

हे शुभङ्कर हे शिवङ्कर हे नयेश्वर पाठ्यताम्
सर्वशास्त्रज सर्वरक्षक सर्वभक्षक रक्ष माम् ।
मौलिगङ्ग च मौलिचन्द्र च व्याघ्रचर्मधरैहि माम्
हे पुरान्तक हे स्मरान्तक हे गजान्तक पाहि माम् ।।४।।

भूतपूजित मान्यवन्दित भक्ततारक रक्ष हे ।
नीलकण्ठ मुनीन्द्रपूजित नीलशङ्कर पाहि माम्
कण्ठसर्प तपस्विसाधुमहासुरेश कलेश हे
कार्तिकेयगुरो गणेशगुरो महेश सुरक्ष माम् ।।५।।

शैवशङ्कर शैवशङ्कर शैवशङ्कर शं कुरु ।
गोपतीश्वर चिन्तनेश्वर वन्दनां मम स्वीकुरु ।।

।। इति श्रीहरिविरचितं शिवपञ्चकं सम्पूर्णम् ।।

# ।। देवीस्तोत्राणि ।।

## ।। उमासप्तकम् ।।



अयि सुखवर्षिणि दुःखनिवारिणि पापसुनाशिनि जाड्यहरे

सुरवररक्षिणि घोरतपस्विनि शम्भुविलासिनि मान्यशिवे ।

नरगणपालिनि साधुवरार्चिनि दैत्यभयंकरि पुण्यपरे

जय वरदे गणराजसुतोषिणि षण्मुखपोषिणि शैवरते ।।१।।

नवनवरूपमनोहरधारिणि भावसुकाङ्क्षिणि भावरते

जनगणनित्यसुशंससुरागिणि नित्यकलारमणीयवरे।

सुजनसुरञ्जिनि दुर्जनतापिनि कालभयापहनाट्यवरे

जय वरदे गणराजसुतोषिणि षण्मुखपोषिणि शैवरते ।।२।।

जय जय हे भवजीवधरे भवतापविमोचितशोकहरे

जय सुहृदासुरशंखनिनादिनि किल्मिषनाशिनि घोषकृते ।

जयतु मुदा दनुपुत्रविघातिनि पापनिवारिणि पुण्यवरे

जय वरदे गणराजसुतोषिणि षण्मुखपोषिणि शैवरते।।३।।

धनवरदायिनि धन्यसुगन्धिनि धन्यसुहासिनि धन्यमते

कृषिकजनेष्वनुमोदसुखंवरदायिनि कीर्तनहासरमे ।

हरितसुधान्यसुरूपसुशोभिनि सृष्टिसुरोहिणि पुष्टिकरे

जय वरदे गणराजसुतोषिणि षण्मुखपोषिणि शैवरते ।।४।।

गिरिवरपुण्यसुगौरि सुकोमलदेहवरे मदलोभहरे

हरपुरवासिनि स्तुत्यकुटुम्बिनि हृत्यमले दिनदोषहरे ।

खलदलभञ्जिनि केसरिरोहिणि शस्त्रसुधारिणि वन्द्यशिवे

जय वरदे गणराजसुतोषिणि षण्मुखपोषिणि शैवरते ।।५।।

जय भयतारिणि शंकरतोषिणि शंकरकामिनि हे गिरिजे

हे सुरवर्षिणि हेऽसुरमर्दिनि हे सुरमानिनि हेऽतुलदे ।

सकलकलामयि हे ललिते सुमनस्सुमनैरभिवन्द्यशिवे

जय वरदे गणराजसुतोषिणि षण्मुखपोषिणि शैवरते ।।६।।

लयभयकारिणि संगरगामिनि केसरिगर्जिनि पुष्टभुजे

रिपुदलवारिणि हे ललनावरदिव्यनिनादिनि शक्तिपरे ।

महिषवरानतमस्तकभेदिनि लिम्पितलोहितशूलकरे

जय वरदेऽभयदायकतोषिणि भक्तसुपोषिणि नम्यवरे ।।७।।



।। इति श्रीहरिविरचितम् उमासप्तकं सम्पूर्णम् ।।

## ।। नवदुर्गास्तोत्रम् ।।

धान्यदे हर्षदे देवि कृषकानन्ददायिनि ।

सद्य: स्वहन्यमानेषु प्रसन्ना भव सर्वदे ।।१।।

सतीनाम्नी शम्भुपत्नी पार्वती सान्यजन्मनि ।

नमामस्तां शैलपुत्रीं शारदीयमहोत्सवे ।। २ ।।

अपर्णा ध्यानमग्ना या कठोरं तापसंकरी ।

ब्रह्मणा (तपसा) शांकरीजाता नमोऽस्तु ब्रह्मचारिणि ।। ३ ।।

मनःशान्तिकल्याणसौख्यादि सर्वं

ददातु क्षमां सिंहपृष्ठासने त्वम् ।

शशीवास्ति कान्तिस्तु घण्टेव नादो

नमः स्वस्तिदे कान्तिदे चन्द्रघण्टे ।। ४ ।।

नमः कालरूपे सुपाहि त्रिलोकान्

धनुःशङ्खचक्रादिशस्त्रान् करेषु ।

त्वया नाशिता मे विपन्ना ह्यवस्था

नमः स्वस्तिदे कान्तिदे चन्द्रघण्टे ।। ५ ।।

यया ब्रह्माण्डमुत्पन्नं केवलं स्मितहास्यया ।

आद्यशक्तिश्च विख्याता कूष्माण्डायै नमो नमः ।। ६ ।।

सिंहासनाष्टबाहुर्या सूर्यमण्डलवासिनी ।

सूर्यतेजोधृतं तस्यै कूष्माण्डायै नमो नमः।। ७ ।।

स्कन्दमाता शरण्या या चतुर्बाहुसमन्विता ।

पद्मासना पद्महस्ता मोक्षमार्गप्रदायिनी ।। ८ ।।

महिषासुरनाशाय कात्यायनेन पूजिता ।
सिंहारूढासिहस्ता या कात्यायनि नमोऽस्तुते ।। ९ ।।

नमः कृष्णवर्णे नमो मुक्तकेशे
भयंकारिणी त्वं शुभंदायिनी त्वम् ।
नमो भूतप्रेतादिभीतत्रिनेत्रे
नमः कालरात्र्यै जगत्त्वं सुपाहि ।। १० ।।

महाशैलजा या महादेवजाया
महाश्वेतपद्मा महाश्वेतवर्णा ।
महाशान्तशीला महागौरवी या
महाशूलहस्ते मही रक्षणीया ।। ११ ।।

शिवश्चाष्टसिद्धिं गतो ध्यानकाले
तवैव प्रसादेन सार्धाङ्गशोभा ।
मन:कामनाः पूर्णकर्त्री च भर्त्री
सदा त्वां नुमो हे सुखंसिद्धिदात्रि ।। १२ ।।

य: कोऽपि च पठेत् स्तोत्रं भुक्तिमुक्तिप्रदायकम् ।
देव्य: सर्वा: सर्वहस्तै: प्रयच्छन्ति सुखं मुदा ।। १३ ।।

।। इति श्रीहरिविरचितं नवदुर्गास्तोत्रं सम्पूर्णम् ।।

## ।। देवीप्रसादपञ्चकम् ।।

कदाचिन्न कुर्यात्स दुष्टाभिमानः
सदा नम्रभावेन कार्यं करोति ।
जिताः सर्वलोकाः स्ववाचा हि येन
स देवीप्रसादः सुलब्धो नतेन ।।१।।

सदा नम्रवाणी मुखे राजते सा
सदा सुष्ठु हास्यं मुखे शोभते वा ।
जयो येन कामारिषु त्वत्र लब्धः
स देवीप्रसादः सुलब्धो नतेन ।।२।।

सदा सर्वशास्त्रेषु नित्यं रतो यः
सदा गर्भसारो ह्यधीतश्च येन ।
सदा चिन्तने यस्य दानादि सर्वम्
स देवीप्रसादः सुलब्धो नतेन ।।३।।

सदा गर्वभारः सदा दर्पवाणी
सदा दुर्विचारः सदा सर्पशीलम् ।
सदा शून्यधर्मः सदावैधकर्म
स देवीप्रसादः सुलब्धो न तेन ।।४।।

सदा चार्पिताः सर्वभावा हि येन
सदा चार्पिताः सर्वकामा हि येन ।
सदा सिद्धकर्मा सदा ज्ञातधर्मः
स देवीप्रसादः सुलब्धो नतेन ।।५।।

।। इति श्रीहरिविरचितं देवीप्रसादपञ्चकं सम्पूर्णम् ।।

## ।। मल्हारपञ्चकम् ।।



जयं देहि मार्तण्ड धान्यं सुपुत्रम्
कृपा ते सदा वर्षतु क्षेमसौख्यम्
तव प्रार्थना सर्वकामान् ददाति
नमो जेजुरीवासिमल्हार पाहि ।।१।।

महाराक्षसेभ्यो मनस्तापदायी
महादैवतेभ्यो भृशं मोददायी ।
महासाधकेभ्यश्चिरं मोक्षदायी
नमो जेजुरीवासिमल्हार पाहि ।।2।।

ललाटे च सा बालचन्द्रस्य शोभा
ललामस्य ते कान्तिरेवाद्वितीया ।
लतापुष्पपूज्या सुमूर्तिस्त्वदीया
नमो जेजुरीवासिमल्हार पाहि ।।3।।

हरिद्रा हि ते भालदेशे सुभाति
हता येन शुंभादिदैत्या रणेषु ।
हृदा शोभते म्हाळसादेव नित्यं
नमो जेजुरीवासिमल्हार पाहि।।4।।

रविश्चन्द्रमा देवताः स्तूयते यो
रमेशादिभूतादिसामर्थ्यदाता ।
रतो नित्यभक्तेच्छपूर्तौ सदा हि
नमो जेजुरीवासिमल्हार पाहि ।।5।।

।। इति श्रीहरिविरचितं मल्हारपञ्चकं सम्पूर्णम्।।

# ।। विष्णुस्तोत्राणि ।।

## ।। सामर्थ्याष्टकम्।।



पालकः पालकेभ्योऽपि तारकेभ्योऽपि तारकः ।

सङ्कटानां निवारार्थं समर्थो मे हरिः सदा ।।१।।

शरीरं मायया व्याप्तं मोहेनैवेन्द्रियाणि मे ।

रक्षितं येन सदा नित्यं समर्थो मे हरिः सदा ।।२।।

माता पिता गुरुः सर्वे नित्यं कुप्यन्ति बान्धवाः ।

वत्सलो यः सदा नित्यं समर्थो मे हरिः सदा ।।३।।

चिन्तितं जीवनेऽस्मिन् वा सत्कार्यं मद्भविष्यति ।

सदैवारक्षको मृत्योः समर्थो मे हरिः सदा ।।४।।

पूज्यते यदि भावेन काङ्क्षितं यदि चात्मना ।

दायकः स मुदा सर्वं समर्थो मे हरिः सदा ।।५।।

किं वदामि समीपे ते द्वैतीभावः कदापि न ।

पाति सर्वान्हृदा नित्यं समर्थो मे हरिः सदा ।।६।।

श्रूयतां श्रूयतां नाम पूज्येतां चरणौ तथा ।
स्मर्यतां स्मर्यतां कृष्णः समर्थो मे हरिः सदा ।।७।।
ह्रियते त्रिविधं कष्टं ह्रियते पापदुस्तरम् ।
चिदानन्दस्वरूपोऽयं समर्थो मे हरिः सदा ।।८।।
।। इति श्रीहरिविरचितं सामर्थ्याष्टकं सम्पूर्णम् ।।

## ।। रक्षासप्तकम् ।।

विनयामृतधन गोधनचन्दन वादय मुरलिं मधुमधुरम् ।
गोपचित्त आयाहि तु हृदयं सुक्षीरसागरतः ।।१।।
कलियुगमानवमदने लुप्ता नारी जाता तु भ्रष्टा ।
तारक एहि दीनजनानां त्वं सुक्षीरसागरतः ।।२।।
विश्वेऽस्मिन्किं प्रचलति सर्वे कामार्थं प्रति धावन्ति ।
धर्ममोक्षकारणाय एहि त्वं सुक्षीरसागरतः ।।३।।
त्यागेन हि संस्कृतस्य सद्यः संस्कृतिर्गता च संकृतिम् ।
संस्कृतेस्तु रक्षणाय एहि त्वं सुक्षीरसागरतः ।।४।।
न्यूना वृक्षा जलमपि न्यूनं न्यूनं सृष्टेर्हि वैभवम् ।
पूर्वं हाहाकारादेहि त्वं सुक्षीरसागरतः ।।५।।
त्वं हि रक्षणकर्तास्माकं पालको हि भूमिजानाम्।
स्वधर्मस्य पालनाय एहि त्वं क्षीरसागरतः ।।६।।
अन्यथा न मे शरणं कोऽपि त्वं हि त्राता सर्वेषाम् ।
भक्तानां रक्षणाय एहि त्वं क्षीरसागरतः ।।७।।
।। इति श्रीहरिविरचितं रक्षासप्तकं सम्पूर्णम् ।।

## ।। दशावतारस्तोत्रम् ।।

प्रलयकालसम्प्राप्ते वेदानां नश्यतां जले ।
मीनकायं त्वया धृत्वा रक्षितं वेदवाङ्मयम् ।।
नमस्ते मीनरूपाय नमस्ते विष्णवे नमः।।१।।
समुद्रमन्थने काले लीनायां भुवि सागरे ।
धृत्वा कच्छपरूपं तत्स्वपृष्ठे धरिणी धृता ।।
नमस्ते कूर्मरूपाय नमस्ते विष्णवे नमः।।२।।
राक्षसैः पृथिवी नीता सागरस्य तलं यदा ।
हाहाकारश्च सर्वत्र तदा त्वं सूकरोऽभवः ।।
ग्रहीतुं दन्तयोः पृथ्वीं जले मज्जितवान्स्वयम् ।
राक्षसांश्च पराभूय महीधरः स आगतः।।
नमो वराहरूपाय नमस्ते विष्णवे नमः।।३।।
प्राप्तवरासुरस्यैव हिरण्यकशिपोस्तनुम् ।
भेत्तुं तीक्ष्णनखैः साये स्तम्भादायान्नृकेसरी ।।
नमस्ते नरसिंहाय नमस्ते विष्णवे नमः।।४।।
बटुवामनरूपेण गतस्त्वं हि बलेर्मखम् ।
द्विपादेन द्विलोकं च व्याप्तं विशालदेहिना।।
तृतीयं चरणं तस्य संस्थाप्य शिरसि बलेः ।
दत्तं पातालराज्यं च राक्षसोद्धरणाय हि।।
नमो वामनरूपाय नमस्ते विष्णवे नमः ।।५।।
क्षत्रियकुलतापो यः प्रखरस्तापसङ्करः।
मातृजन्यं पितृनिष्ठं भार्गवं प्रणमाम्यहम् ।।

नमः परशुरामाय नमस्ते विष्णवे नमः ।।६।।

रणे वीरं तथा धीरं राक्षसेभ्यविनाशकम् ।
एकपत्नीव्रतं रामं नमामि भूपतिं वरम् ।।
नमो राघवरूपाय नमस्ते विष्णवे नमः ।।७।।

कृष्णाग्रजं नागनाथमोहिणीतनुजं वरम् ।
सुयोधनगुरुं देवं तं नमामि हलायुधम् ।।
नमस्ते बलरामाय नमस्ते विष्णवे नमः।।८।।

दृष्ट्वा दुःखं समाजस्य अन्तर्भूतः स जातः ।
निन्दिता यज्ञहत्या सा तं नमामि तथागतम् ।।
नमस्ते बुद्धरूपाय नमस्ते विष्णवे नमः।।९।।

म्लेच्छानां विनिपाताय हस्तेऽसिं धरसे खलु ।
धर्मसंस्थापनायैव कल्किरूपं गमिष्यसि ।।
नमस्ते कल्किरूपाय नमस्ते विष्णवे नमः ।।१०।।

स्तोत्रे दशावतारेऽस्मिन् नारायणस्तुतिः खलु ।
भूयात्स्तोत्रमिदं नित्यं सर्वमङ्गलकारकम् ।।११।।

।। इति श्रीहरिविरचितं दशावतारस्तोत्रं सम्पूर्णम् ।।



# ।। नदीस्तोत्राणि ।।

## ।। यमुनालहरी ।।



यमुनातीरं यमुनानीरं यमुनापारं यमुनासारम् ।
यमुनाक्रीडा यमुनाव्रीडा यमुनासरितस्सकलं शरणम् ।।१।।

यमुनाशिक्षा यमुनाभिक्षा यमुनावीक्षा यमुनादीक्षा ।
यमुनासृष्टिर्यमुनातृप्तिर्यमुनासरितस्सकलं शरणम् ।।२।।

यमुनागोपा यमुनानारी यमुनाबाला यमुनावृद्धा ।
यमुनाशीला यमुनालीला यमुनासरितस्सकलं शरणम् ।।३।।

यमुनावृषभो यमुनावृक्षा यमुनाधेनुर्यमुनाधीरा।
यमुनाकृष्टिर्यमुनावृष्टिर्यमुनासरितस्सकलं शरणम् ।।४।।

यमुनावासो यमुनावासो यमुनावासो यमुनावासः।

यमुनातालो यमुनाकालो यमुनासरितस्सकलं शरणम् ।।५।।

यमुनानृत्यं यमुनाकृत्यं यमुनावृत्यं यमुनाहारः।

यमुनाधारा यमुनाकारा यमुनासरितस्सकलं शरणम् ।।६।।

यमुनारात्रिर्यमुनानिद्रा यमुनाशैत्यं यमुनाच्छाया ।

यमुनाव्याप्तिर्यमुनाप्राप्तिर्यमुनासरितस्सकलं शरणम् ।।७।।

यमुनातरणं यमुनाभरणं यमुनावेगो यमुनावेगः ।

यमुनामौनं यमुनाभीतिर्यमुनासरितस्सकलं शरणम् ।।८।।

यमुनाशक्तिर्यमुनाभुक्तिर्यमुनाक्लृप्तिर्यमुनायागः।

यमुनाधूतं यमुनापूतं यमुनासरितस्सकलं शरणम् ।।९।।

यमुनाक्रोधो यमुनाभ्रान्तिर्यमुनाबोधो यमुनाशान्तिः ।

यमुनानाट्यं यमुनाधार्ष्ट्यं यमुनासरितस्सकलं शरणम् ।।१०।।

यमुनाश्रवणं यमुनाश्रमणं यमुनाभ्रमणं यमुनाक्रमणम् ।

यमुनाद्रवणं यमुनारमणं यमुनासरितस्सकलं शरणम् ।।११।।

।। इति श्रीहरिविरचिता यमुनालहरी सम्पूर्णा ।।

## ।। तरङ्गिणीपञ्चकम् ।।



तरङ्गावलिस्ते बलाकैश्च भाति
सदा सर्वदेवैर्नता ते सुकीर्तिः ।
जटाजूटधारानुगन्त्री जवेन
नमो मानगङ्गे तरङ्गिण्यजाये ।।1।।

प्रभाते जनानां सदा नन्दनीया
प्रभाते हि नानाविधप्रार्थनीया ।
प्रभाते कराभ्यां सदा वन्दनीया
नमः शैवगङ्गे तरङ्गिण्यजाये ।।2।।

सदा चौषधीनां रसानीतगर्भा
त्वया विश्वकल्याणवीथिर्हि भुक्ता ।
जनानां मुदा पापरक्षां करोषि
नमस्ते सुगङ्गे तरङ्गिण्यजाये ।।3।।

सदा शुद्धनीरा सदा पूतवीरा
शिवप्रस्थलंगामिनी या प्रसन्ना ।
पवित्रं हि सर्वं करोतीह नित्यं
नमः शैलकन्ये तरङ्गिण्यजाये ।।4।।

सदाराधनीया सदा जीवधारा
हृदा या नरेन्द्रैः सदा पूजनीया ।
चिरंजीविनि त्वं धरित्रीतलेऽस्मिन्
नमो धन्यगङ्गे तरङ्गिण्यजाये ।।5।।

।। इति श्रीहरिविरचितं तरङ्गिणीपञ्चकं सम्पूर्णम् ।।

## ।। नदीस्तोत्रम् ।।

भारतीया जना नित्यं मन्यन्ते मातरं नदीम् ।
किन्तु तस्या महत्त्वं च नाभिजानन्ति ते हृदि ।। १ ।।
नदीनां स्मरणं पुण्यं पापतापविनाशकम् ।
अतो वदामि नदीनाम सौख्यक्षेमकरं मुदा ।। २ ।।
तत्र मुख्यनदः सिन्धुः स खलु पञ्चजः स्मृतः ।
झेलमचिनाबराव्यश्च तटिन्यौ व्याससत्लजे ।। ३ ।।
पुण्या गङ्गा वङ्गदेशे पद्मानाम्नाऽभिधीयते ।
गण्डकी वाग्मती कोसी घाग्रा तस्याः सहायिकाः ।। ४ ।।
प्रयागे मिलति गङ्गां ज्ञेया सा यमुनानदी ।
चम्बलबेतवानद्यस्तस्या एव सहायिकाः ।। ५ ।।
'साँपो' एव ब्रह्मपुत्रा वङ्गे तु जमुना खलु ।
पद्मा च जमुना यत्र मिलतः सैव मेघना ।। ६ ।।
अरावलीगिरेर्लूनी तिस्रस्त्वमरकण्टके ।
शोणा महानदी चैव तृतीया नर्मदा खलु ।। ७ ।।
तापीनदी सूर्यकन्या ताप्तीनाम्नाऽभिधीयते ।
नाशिके दक्षिणस्थैव गङ्गा गोदावरीनदी ।। ८।।
कृष्णानदी च कावेरी प्रसिद्धे ते च दक्षिणे ।
सकलप्राणिनां प्राणास्तिष्ठन्ति च जलेन हि ।। ९ ।।
नदीनामानि चैतानि यः पठेच्च दिने दिने ।
तस्य पूर्णा भविष्यन्ति कामना जगतीतले ।। १० ।।
।। इति श्रीहरिविरचितं नदीस्तोत्रं सम्पूर्णम् ।।

## ।। नर्मदास्तोत्रम् ।।

कर्म देहि नर्म देहि शर्म देहि मर्मदे ।
सर्वमर्त्यरक्षणाय नर्मदे तु धर्मदे ।। १ ।।

विश्वधात्रि विश्वदात्रि दु:खहर्त्रि सौख्यदे ।
सर्वजीवपोषणाय नर्मदे तु धान्यदे ।। २ ।।

भुक्तिदे तु भक्तिदे तु युक्तिदे तु युग्मदे ।
सर्वजीवरक्षणाय नर्मदे तु हर्म्यदे ।। ३ ।।

पापतापदु:खसर्पवारणाय शक्तिदे ।
चिदानन्दवासाय नर्मदे तु मुक्तिदे ।। ४ ।।

नीलकण्ठकेशजालनागमालसौख्यदे ।
नर्मदापरिक्रमाय योगदे तु नर्मदे ।। ५ ।।

स्नेहमयीच्छाया ते मातृवद्धि माया ते ।
पवनीया मोक्तव्या: सकलानां कायास्ते ।। ६ ।।

।। इति श्रीहरिविरचितं नर्मदास्तोत्रं सम्पूर्णम् ।।

## ।। प्रशस्तिकाव्यम् ।।

### नम्यः शिवराजः ।



इन्द्रो वृत्रासुराय, रामो लङ्केश्वराय ।
म्लेंच्छानां मर्दनाय, अलं स शिवराजः ।।१।।

सह्यगिरेः पुत्रोऽयम्, समराङ्गणरुद्रोऽयम्।
प्रजासु खलु भद्रोऽयम्, रम्यः शिवराजः।।२।।

स्वराज्यसंस्थापकः, स्वभाषासंजीवकः ।
स्वधर्मस्य रक्षकः, धन्यः शिवराजः।।३।।

दुर्गाणां निर्माता, नौदलस्य चैव पिता ।
महाराष्ट्रभूमौ तु, नम्यः शिवराजः ।।४।।

सकलधर्मपालकः, अधर्मस्य शासकः ।
सकलविश्ववन्द्यः स, श्रेष्ठः शिवराजः ।।५।।

शहाजेस्सुपुत्राय, जिजामातृसिंहाय ।
शम्भुराजजनकाय, नमो राष्ट्रपुरुषाय ।।६।।

## ।। तिलकस्मरणम् ।।



स्वराज्यं मे जन्मसिद्धो हयधिकारो भवत्ययम् ।
प्राप्स्यामि निश्चयेनाहं येनेति गर्जना कृता ।।१।।
मराठा केसरी तस्य वृत्तपत्रद्वयं खलु ।
अग्रलेखैश्च देशेषु क्रान्तिज्वाला प्रसारिता ।।२।।
संस्कृतज्ञः खगोलज्ञो गणितज्ञश्च पण्डितः ।
आङ्ग्लभाषाप्रवीणः स कविः सङ्गीतसुज्ञः ।।३।।
कारायां येन स्थित्वाऽपि लिखितो धीमता महान् ।
गीतारहस्यनाम्ना स ग्रन्थो विश्वे प्रसिद्धः ।।४।।
आङ्ग्लशासकतापं तं प्रखरं राष्ट्रसेवकम् ।
लोकमान्यं जगन्मान्यं तिलकं तं स्मराम्यहम् ।।५।।

## ।। नटवर्यसप्तकम् ।।

सप्तकमेतत्नटवर्यप्रभाकरपणशीकरमहोदयेभ्यः समर्पितमस्ति।



नाट्याधीशं सुवन्दे नटनगुणनिधिं वासुदेवस्य पुत्रम्
पादाक्रान्ता हि येयं सततसकलभूः सा महाराष्ट्रभूमिः।
प्राप्तं नैपुण्यमेवं **नवनटविविधैर्यत्प्रसादेन** नित्यम्
आदित्याश्रित्यलोका अनुभवरहिता लब्धसंपन्नमार्गाः ।।१।।

नाधीता येन विद्या गमितसदनो निश्चयस्य प्रमेरुः
सानन्दो नाट्यगर्भो गमितदिवसः सोढशारीरकष्टः।
कार्यं कुर्वन्सदाऽयं प्रतिभनवनवोप्राप्तकीर्तिर्जनेषु
कार्यारब्धा हि सन्तः सकलगुणधना पूर्णतां यान्ति नित्यम् ।।२।।

अतो वदामि -

नटानां नटोऽयं सुकीर्तिस्त्वदीया
सदा नाट्यरम्या सुमूर्तिस्त्वदीया ।
त्वया शिक्षिता रङ्गमञ्चस्थभावा:
प्रभायै नमस्ते नटाधीश्वरस्य ।।३।।

रतो लब्धकीर्तिः सदा नाटकेषु
महाराष्ट्रभूमे रजस्तल्ललाटे ।
सुनाट्यप्रयोगाय सिद्धः सदाऽयम्
प्रभायै नमो रङ्गभूमिप्रियस्य ।।४।।

मनस्येव नाट्यं जनस्तेऽपि नाट्यं
सुसख्यं सुहृद्यं ननु प्राणनाट्यम् ।
विना नाटकं ते मनो नैव युङ्क्ते
प्रभायै नमो नाट्यसञ्जीवितस्य ।।५।।

लखोबा स औरङ्गजेबो हि सर्वे
त्वया जीविता लीलया रङ्गभूमौ ।
गभीरो ध्वनिः सुष्ठुकायः सतेजाः
प्रभायै नमः पात्रसञ्जीवितस्य ।।६।।

प्रभा नाम ते सर्वलोकैर्विमान्या
कला नाम ते सर्वकालेषु वन्द्या ।
करैर्वन्दिता त्यागवृत्तिर्जनैर्हि
प्रभायै नमस्ते कलाजीवनाय ।।७।।

।। इति श्रीहरिविरचितं नटवर्यसप्तकं सम्पूर्णम् ।।

## ।। सन्ध्यासप्तकम् ।।



(डॉ. सन्ध्या पुरेचा)

पुरेचाकुलं विश्वकीर्तिं च नेतुं
यया स्वीकृतं जन्म तस्मिन्कुटुम्बे ।
सदा संस्कृते भारते प्रीतिरस्या
जनैर्नम्यते त्यागशीला सुसन्ध्या ।।१।।

प्रिया गुर्जरीमातृभाषा हि तस्याः
तथापि 'मराठी' सलीलं वदन्ती ।
यथा जन्मभूमिस्तथा कर्मभूमिः
तया नम्यमाना महाराष्ट्रभूमिः ।।२।।

सुनृत्यस्य बीजं हि पित्रैव दृष्टं
गुरुं पार्वतीपुत्रवरं च नीता ।
सदा प्रेरणानीतिविश्वासमायो
बहु स्मर्यतेऽयं तया तस्य भावः ।।३।।

सदा नाट्यशास्त्रं गुरोर्या पठन्ती
कृतो रङ्गमञ्चे सशास्त्रः प्रयोगः ।
यया जीवनं नृत्यकार्याय दत्तं
नमो नाट्यवर्ये नमः कोटिवारम् ।।४।।

सुनाट्यं हि प्राणाः सुनाट्यं च हृद्यं
तया जीवनं नाट्यकार्याय दत्तम् ।
अतः शासनेनाऽपि सम्मानिता या
नमो नाट्यवर्ये नमः कोटिवारम् ।।५।।

गुरुं चाऽनुगम्या गुरुप्रेमरम्या
गुरुस्तोत्रगीता गुरुं स्मर्यमाणा ।
सदाऽनन्दलीना चिदानन्दमग्ना
नमो मातृरूपे गुरुस्थानगम्ये ।।६।।

सदा भावगम्या सुसंस्कारजन्या
मुदा शिष्यरम्या हृदा शिष्यरम्या ।
तपस्तेजसा या भुवि राजते वै
सदा वन्दनीया गुरुः सा सुसन्ध्या ।।७।।

।। इति श्रीहरिविरचितं सन्ध्यासप्तकं सम्पूर्णम् ।।

## ।। गौरीस्थिता हि माधुरी ।।



(डॉ. गौरी माहुलीकर - चिन्मय इंटरनॅशनल विद्यापीठ)

कुत्र गच्छामि स्वर्गाद् भो: माधुरी वदति शिवम् ।
शिवेनोक्तं विनायासं गच्छ त्वं पृथिवीतलम् ।। १ ।।
वेदमग्ना सदालीना या सदा संस्कृते रता ।
तस्यां मुखे विराजस्व भव त्वं ज्ञानश्रीप्रदा ।। २ ।।
नैकरूपाणि धृत्वैवं वस त्वं पृथिवीतले ।
इत्युक्त्वा च शिवं नत्वा माधुरी पृथिवीं गता ।। ३ ।।
अत्रागत्य भृशं दृष्ट्वा अन्ते प्राप्ता च पार्वती ।
शिवेनोक्तं यथा तद्वत् सा लीनाऽसीच्च मामखे ।। ४ ।।
हृष्टा प्रविश्य सानन्दं वेदवाग्वल्लभीमुखे ।
तदारभ्य च जिह्वायां माधुरी लसति मुखे ।। ५ ।।
पार्वतीं मेलितुं सर्वे यदाऽऽगच्छन्ति पाठका: ।
तदा गौर्यभिधाना सा ज्ञानेनानन्दति जनान् ।। ६ ।।

शब्दा एव हि शस्त्राणि पुष्पाण्यपि भवन्ति ते ।
माधुर्या जीयते विश्वं माधुर्याश्रितसद्गुणाः ।। ७ ।।

माधुरीहुतक्रोधादिर्लीना ज्ञानाकरः खलु ।
गौरवादिप्राप्तलोका रीतिनीत्यवमण्डिता ।। ८ ।।

वेदवाङ्मयमग्ना सा चारुशीला सुमङ्गला ।
माहुलीकरवन्द्या सा ज्ञानरम्या सुनन्दना ।। ९ ।।

शुभाः सन्तु हि पन्थानः पुनरागमनाय च ।
त्रैलोक्यस्य विना गौरीं मनः केनोपशाम्यते ।। १० ।।

अनुप्राससमायुक्ता माधुर्यशब्दमिश्रिता ।
जगन्मान्या हि गङ्गेव गौरीवाणी विराजते ।। ११ ।।

## ।। मञ्जूषाष्टकम् ।।



### (डॉ. मञ्जूषा गोखले)

संस्कृते प्रीतिरस्या हि जीवनं संस्कृतं खलु ।
मञ्जूषागोखलेदेवी शारदेव विराजते ।।१।।

कालिदासप्रिया कान्ता काव्यशास्त्रे च पण्डिता ।
कथाकथनसम्राज्ञी जयन्ती हृदयं सदा ।।२।।

वेदसाहित्यशास्त्राणि पाठितानि च लीलया ।
दिव्यदृष्टिश्च शोधाय छात्रैः प्राप्ता क्षणे क्षणे ।।३।।

माधुर्या शोभते वाणी ज्ञानदाने सदा रता ।
अतः शिष्यप्रिया सैव शिष्याणामपि सा प्रिया ।।४।।

न जाने कति ते शिष्याः तयैव शिक्षकाः कृताः ।
हिताय सर्वशिष्याणां तया जीवनमर्पितम् ।।५।।

महोत्सवेषु वैविध्यं तया चायोजितं सदा ।
प्रतिवर्षं प्रतीक्षन्ते जना ज्ञानपिपासवः ।।६।।

निमग्ना काव्यगङ्गायां तत्र वक्रोक्तिमौक्तिकम् ।
न जाने कति रत्नानि शोभन्ते चाधिमञ्जुषम् ।।७।।

उद्बोधिका यशोदा सा वत्सला मार्गदर्शिका ।
विदुषी विदुषां मान्या जयति जगतीतले ।।८।।

।। इति श्रीहरिविरचितं मञ्जूषाष्टकं सम्पूर्णम् ।।

## ।। नवलाष्टकम् ।।



(श्री. नवलसेठ-गोदरेजमहाशय: । )

योजकं दूरद्रष्टारं कार्यकर्तृप्रियं जनम् ।

महान्तं तं महाभागं नवलाख्यं नमाम्यहम् ।।१।।

स्मितं हास्यं प्रेमपूर्णं मुखे यस्य विराजते ।

विनम्रा तस्य वाणी या शारदेव सुशोभते ।।२।।

आधारः सर्वजातीनां हृदयं सर्वदेहिनाम् ।

छायादो भवतापे सः वटवृक्षो महानयम् ।।३।।

सौहार्दस्य तडागोऽयं सौजन्यस्यामृतं जलम् ।

गुणानामाकरो धन्यो भूयो भूयो नमाम्यहम् ।।४।।

पाठोऽनुशासनस्यैव पाठितो येन सर्वदा ।

आदर्श: सर्वकार्येषु चानुगच्छामि तं मुदा ।।५।।

जितक्रोधः स्थितप्रज्ञः सूक्ष्मदृष्टिश्च तारकः ।

कृतं येन सुदैवं हि वन्दे छात्रप्रियं गुरुम् ।।६।।

उज्ज्वलं सर्वलोकानां भविष्यं भवता कृतम् ।

जीवनं सुकरं जातं दुःखार्तश्रमजीविनाम् ।।७।।

अस्मिन्वर्षे शतकपूर्तिः जन्मनो भवतो ननु ।

कार्यस्य स्मरणं सर्वैः क्रियते च युगे युगे ।।८।।

।। इति श्रीहरिविरचितं नवलाष्टकं सम्पूर्णम् ।।

## ।। रेखासप्तकम् ।।



**(श्रीमती रेखा अजय: पाण्डे:)**

कलाप्रीतिरस्या सुनृत्येऽपि गीते

यया गुर्जरीमातृभाषा सुलेभे ।

तथाप्युर्दुहिन्द्याङ्ग्लभाषाप्रभुत्वं

नमो भाग्यरेखे नमः कोटिवारम् ।।१।।

सदा कार्यकौशल्यराज्ञी प्रसिद्धा

मुदा लब्धनीतिः सुवाचि प्रभुत्वम् ।

सदा राजते शारदा तन्मुखे सा

नमो भाग्यरेखे नमः कोटिवारम् ।।२।।

सदा नम्रवाणी सदा पथ्यभाषा

सुधाया निवासः सदा मोदजिह्वा ।

ऋतं नित्यसूक्तं प्रियं वाऽप्रियं वा

नमो भाग्यरेखे नमः कोटिवारम् ।।३।।

गुणग्राहिणी या गुणश्राविणी या

सदा योजिका या सदाऽऽयोजिका या ।

अयोग्यो न कोऽपीति तन्मूलमन्त्रं

नमो भाग्यरेखे नमः कोटिवारम् ।।४।।

सुहास्या सुनेत्री विनम्रा सुशीला

सुलेखा सदा ध्येयपन्थानुगम्या ।

जनानां हृदि प्राप्तमाना सदैव

नमो भाग्यरेखे नमः कोटिवारम् ।।५।।

ध्येयाकाशी प्रसन्ना बहुगुणनिलया सात्त्विकाहारभोजी

शुद्धाचार्या च काये मनसि वचसि या साधुकर्मानुगम्या ।

नित्यं न्याय्यानुमार्गी खलजननमिता सर्ववादान्जयन्ती

आदर्शा प्राप्तविद्या गणपतिविनता मातृरूपे नमस्ते ।।६।।

नेतृत्वगुणसंपन्ना कलावाङ्मयसाधिका ।

प्राचार्या मातृरूपेण विद्यालये विराजते ।।७।।



।। इति श्रीहरिविरचितं रेखासप्तकं सम्पूर्णम् ।।

## ।। बालगीतानि ।।

### ।। वर्षाकाल: ।।

सर सर आयान्ति वर्षाधारा:

अत्र प्रसन्ना: सर्वे जीवा: ।

वृक्षै: प्राप्तं नवजीवनं

नृत्यन्ति मोदेन बाला: सततम् ।।१।।

कृष्णान् मेघान् पश्य आकाशे

धडाम् धुडुम् धडाम् धुडुम् गर्जन्ति ते ।

जलेन क्लिन्नं जातमङ्गम्

धो धो धो वर्षन्ति मेघा: सततम् ।।२।।

धप् धप् पतन्ति जलप्रपाता:

ड्रॅव ड्रॅव कुर्वन्ति कूपमण्डूका: ।

टप् टप् गायन्ति पर्णेषु बिन्दवः

पक्ववटखादने मग्ना जना: ।।३।।

नृत्यं कुर्वन्ति मयूरास्ते

सिंहा गर्जन्ति ननु मेघनाद: ।

सत्वरं वहन्ति सागरं नद्य:

प्राणा हि प्राणिनां वर्षाकाल: ।।४।।

## ।। रे वृक्ष रे वृक्ष ।।

रेऽ वृक्ष रेऽ वृक्ष किं न यच्छसि रे वृक्ष ।

मानवानां जीवनाय सर्वं यच्छसि रे वृक्ष ।।१।।

जलस्रोतांसि रक्षसि शीतलच्छायां यच्छसि ।

मधुरफलानि पत्रपुष्पाणि सर्वं सर्वं यच्छसि ।।२।।

मानवजीवनं वृक्षाधारितम् ।

सजीवजीवनं वृक्षाधारितम्

पृथिवीपोषणं वृक्षाधारितम् ।

पृथिवीरक्षणं वृक्षाधारितम् ।।३।।

पादै: पिबसि जलम् अतस्त्वं पादप: ।

मह्यां रोहसि त्वम् अतस्त्वं महीरुह: ।

शाखा बहव: सन्ति अतस्त्वं शाखी ।

न क्वापि गच्छसि अतोऽचलोऽसि त्वम् ।।४।।

रेऽ वृक्ष रेऽ वृक्ष किं न यच्छसि रे वृक्ष ।

मानवानामुपभोगाय सर्वं यच्छसि रे वृक्ष ।।५।।



## ।। स्वापगीतम् ।।

वायुर्वहति पर्वते स मन्दं मन्दम् ।
बालको मे याति निद्रां मन्दं मन्दम् ।। धृ ।।

आकाशे याति चन्द्रो मन्दं मन्दम्
धरायामपि वहति गङ्गा मन्दं मन्दम् ।
प्रसृता शान्तिश्च भुवने मन्दं मन्दम्
नीडे सुप्ता विहङ्गा मन्दं मन्दम् ।।१।।
वायुर्वहति ... ।। धृ ।।

सुप्तं जनजीवनं
जलजीवनं वनजीवनम् ।
श्वास एकीभूय तेषां
वहति मन्दं मन्दम् ।। २ ।।
वायुर्वहति ... ।। धृ ।।

## ।। सूर्य उदेति पूर्वदिशि ।।



सूर्य उदेति पूर्वदिशि
सृष्टिर्नन्दति किरणैः ।
जीवा भवन्ति जागृताः
क्षेत्रं यान्ति च कृषकाः ।। १ ।।

नवचैतन्यं सर्वत्र
नव्यजीवनं सर्वत्र ।
नव्ययौवनं सर्वत्र
नवसौन्दर्यं सर्वत्र ।। २ ।।

आयाहि रे पूर्वदिशि
पश्यामः सृष्टेश्चित्रम् ।
अपूर्वः अरुणोदयः
अपूर्वः सूर्योदयः ।। ३ ।।

## ।। मे तातः ।।

मे जनकः मे प्रियः ।

आधारो मम मे तातः ।। धृ ।।

प्रमुखः कुटुम्बस्य

प्रियः स कुटुम्बस्य ।

सदा गभीरः सदा स धीरः

सदैव शान्तो मे तातः ।। १ ।।

आधारो मम...

उत्सवे स उत्सुकः

संकटे न विन्मुखः ।

धैर्यवानपि शीलवानपि

आदर्शो मम मे तातः ।। २ ।।

आधारो मम...

धुरां वहति अस्माकं

कल्पतरुश्चास्माकम् ।

सदा वत्सलः ईशलीनः

सदैव नम्रो मे तातः ।। ३ ।।

आधारो मम...

## ।। काव्यसुधा ।।

### ।। भाग्यं मे भारतम् ।।

धीरमस्ति वीरमस्ति शूरमस्ति भारतम्
एकमस्ति राष्ट्रमस्ति भाग्यं मे भारतम् ।
धीरमस्ति वीरमस्ति शूरमस्ति भारतम्
एकमेवाद्वितीयमस्ति मे भारतम् ।। धृ । ।

दानेन त्यागेन आध्यात्मिकज्ञानेन
गुणवैभवेनापि श्लाघ्यते बहु ।
विश्वेऽस्मिन्नेकमेव भाति मे भारतम् ।। १ ।।

भाषाया वैविध्यं निष्ठाया वैविध्यं
विश्वासवैविध्यं प्राप्यते बहु ।
विश्वस्य संस्कृतेर्मूलमस्ति भारतम् ।। २ ।।

श्रूयेत संस्कृतं भाष्येत संस्कृतम्
पठ्येत संस्कृतं लिख्येत संस्कृतम् ।
भारतीयसंस्कृतेर्मूलमस्ति संस्कृतम्
भारती भाग्यदा ननु भाति भारतम् ।। ३ ।।

भारतोऽयं भायां रतोऽयम्
भारतीयसंस्कृतेः पायां तोयम्
धीरमस्ति वीरमस्ति शूरमस्ति भारतम् ।
राष्ट्रमस्ति प्राप्तमस्ति भाग्यं मे भारतम् ।। ४ ।।

## अमृता विश्वविद्यापीठम् ।

भारतस्य दक्षिणस्यां दिशि स्थितम्
विद्यासाहित्यविज्ञानमन्दिरम् ।
दिव्यमस्ति भव्यमस्ति योगसाधनम्
प्रयोगशास्त्रयोश्चात्र सार्थमेलनम् ।।

अमृतापीठम् , विश्वविद्यापीठम्
अमृतस्य पीठम् , विश्वविद्यापीठम् ।।१।।

शालीयच्छात्राणां गेहमेकम्
विज्ञानवाणिज्यकलाज्ञानसाधनम् ।
अभियान्त्रिकीशिक्षणमिह चातुलं वरं
संशोधनजीवनाय प्रेरणास्थलम् ।।२।।

आश्रमोऽयं कलापराणां
भारतीयसंस्कृतेः पूजकानाम् ।
आश्रमोऽयम् संस्कृते रतानाम्
शास्त्रचर्चया शास्त्ररक्षकाणाम् ।।३।।

## ।। प्रकृतिपुरुषसंवादः ।।

**एकदा प्रकृतिपुरुषौ निर्मीय**

**ब्रह्मा उवाच -**

प्रकृतिपुरुषौ नित्यं सृष्टेर्मूलं हि कारणम् ।
मुदैव नम्रभावेन स्वर्गं निर्मातु भूतले ।।१।।
नरो नारीति सम्बन्धः पशुयोनिषु प्राप्यते।
भवेयुर्मानवा नित्यं श्रेष्ठाः सकलजातिषु ।।२।।

**पुरुष उवाच -**

समर्थोऽहं शक्तिमांश्च रक्षामि सङ्कटेभ्यः ।
ते गुणानेव पश्यामि चाधारं हि ददाम्यहम् ।।३।।
बालिकाऽसि यदि त्वं हि पितृरूपेण लालये ।
कन्या वा सुन्दरीवासि भ्रातृरूपेण पालये ।।४।।
वृद्धा वा शक्तिहीना चेत्पुत्ररूपो भवाम्यहम् ।
पिता पुत्रश्च भ्राताहं त्रिरूपाण्येव मे स्युः ।।५।।

**प्रकृतिरुवाच -**

धन्याऽहं ते मनोभावान्ज्ञात्वा शीलं सुचारुताम् ।
सदैवारक्षको भूयाः मन्तव्या संस्कृतिस्त्वया ।।६।।
ममाप्यस्ति च दायित्वं सर्वेषां पोषणस्य हि ।
ते गुणानेव पश्यामि मनःशान्तिं ददाम्यहम् ।।७।।
बालकोऽसि यदि त्वं हि मातृरूपेण लालये ।
पुत्रो वा युवको वासि स्वसृरूपेण पालये ।।८।।
वृद्धो वा शक्तिहीनश्चेत्कन्यारूपा भवाम्यहम् ।
माता स्वसा च कन्याहं त्रिरूपाण्येव मे स्युः ।।९।।

### प्रकृतिपुरुषौ ऊचतुः -

**दायित्वेषु च सर्वेषु मूलं वात्सल्यभावः ।**

**वात्सल्येन हि लभ्यन्ते सुखं सिद्धिर्यशः सदा ।।१०।।**

**इति ज्ञात्वा मनोभावान्ब्रह्मासौख्यं च लब्धवान् ।**

**आशीर्वादांश्च दत्त्वा तौ प्रेषितौ तेन भूतले ।।११।।**

**।। इति श्रीहरिविरचितः प्रकृतिपुरुषसंवादः सम्पूर्णः ।।**

## ।। गान्धार्या: मनोगतम् ।।

### प्रथमं चित्रम् ।

विवाहसमये मेऽपि स्वप्ना आसंश्च मार्दवाः ।
प्रेममुग्धं च मे चित्तं स्वर्गस्योपरि भावितम् ।।१।।
यदा ज्ञातं म अर्धाङ्गो दृष्टिहीनश्चिरं ननु ।
भस्मीभूता हि मे सृष्टिः स्वप्नाः सर्वे दिवंगताः ।।२।।
कोपावेगे च दण्डं हि दातुमैच्छच्च मे मनः ।
कस्य कस्याः कृते वापि दण्डं योक्तुं च मेऽमतिः ।।३।।
जनकं मां जननीं वापि दुर्भाग्यं वा च दण्डये ।
स्वीकृतमन्ततो गत्वा अन्धेव जीवनं मया ।।४।।
न जाने कृतिरेषा हि योग्याऽसीद्वा न वा सखि ।
किमर्थं वा न जाताऽहं दृष्टिर्नाथस्य मे हले ।।५।।
किन्तु नाथसमं सर्वं व्यतीतं जीवनं मया ।
मूढत्वं मेऽथ वा त्यागो मन्ये त्वमसि पण्डिता ।।६।।

### द्वितीयं चित्रम् ।

तस्मिन्कालेऽग्रजो मे वै मामासीत्परितः खलु ।
बन्धुर्नापि तु दुष्टः सः शकुनिर्वंशनाशकः ।।१।।
ज्ञातं तदा कदापिर्न पश्चात्तापोऽधुना सखि ।
समर्थाऽऽसं योग्यमार्गं पुत्रेभ्यो दर्शनाय तु ।।२।।
मयोक्तं बहुवारं तु सुयोधनाय सर्वदा ।
मातुलस्य प्रभावस्तु तस्यासीन्ननु मानसे ।।३।।

भगिनीव तु कुन्ती मे दुर्दैवेन हता खलु ।
प्रासादे मे निवासस्तु कुन्त्यावासस्तु कानने ।।४।।
व्यतीतं जीवनं कष्टैः सपुत्रं क्लेशकारकम् ।
स्वस्नुषायाश्चापमानः सहितो दुःखचेतसा ।।५।।
तथापि मे मनस्यासीत्सुयोधनस्य दिग्जयः ।
अतो मे प्राप्तसामर्थ्यं दत्तं सुयोधनाय हि ।।६।।
किन्तु तदपि मे कार्यं व्यर्थ्यमेव गतं खलु ।
पुत्रस्थो राक्षसस्त्वत्र मया वर्धित एव हि ।।७।।

## तृतीयं चित्रम् ।

तस्मिन्क्षणे चिन्तितं यद्रक्ष्यः पुत्रः स्वतेजसा ।
अन्यथा तद्वधायैव भीम उद्युक्त एव हि ।।१।।
सभायां च कुलीनायां द्रौपदीमानरक्षितुः ।
भीमस्य या प्रतिज्ञाऽसीत्तयैवाहं च व्याकुला ।।२।।
क्रोधाग्निना हि पाञ्चाल्या आचार्या वीरकौरवाः ।
ससुयोधनपुत्रा मे भस्मीभूता महारणे ।।३।।

गत्वाऽन्ततो मया ज्ञातं सत्यमेतन्महत्तमम् -
अपमानः सदा नार्याः यत्र यत्र भवेत्खलु ।
असौख्यमपकीर्तिश्च वंशनाशः सुनिश्चितः ।।४।।

## ।। नारीगौरवम्  ।।



**शक्तिप्रकृतिरूपेण दिव्या या दृश्यते भुवि ।**
**नमस्तस्यै यतो नित्यं शिवोऽपि शव इं विना ।। १ ।।**
**विश्वस्य पोषणं कर्त्रि लालनं पालनं तथा ।**
**वात्सल्यं हृदये नित्यं मातृरूपे नमोऽस्तु ते ।। २ ।।**
**कन्या कान्ता स्वसा पत्नी स्नुषा माता पितामही ।**
**न जाने कति रूपाणि धारयन्ती दिने दिने ।। ३ ।।**
**कार्यकुशलसम्राज्ञी दशबाहुसमन्विता ।**
**विशालहृदया नित्यम् आदिशक्ते नमोऽस्तु ते ।। ४ ।।**
**प्रेयसी महिला माता कन्या पत्नी स्वसा स्नुषा ।**
**ज्ञाता सा वा तथाऽज्ञाता सर्वा रक्ष्या: प्रयत्नत: ।। ५ ।।**

## ।। रचयेम संस्कृतकवनम् ।।

रचयेम संस्कृतकवनम् ।
रचयेम संस्कृतकवनम् ।
लेखनीं विना कर्गजं विना
केवलहस्ताङ्गुलिकलया
संस्कृतवाग्विशेषततया ।।१।।

श्लोको भवतु ... वास्तु समस्या...
कोऽपि विचारः काऽपि चर्चा
तज्ज्ञजनानां चिन्तनं वा
रचयेम संस्कृतस्तवनम्
रचयेम संस्कृतकवनम् ।।२।।

काव्यं विलसतु यज्जनमनसि
प्रसरतु गन्धः काव्यसुमानां
प्रेरयतु मनश्चान्यजनानां
कविजनसंस्कृतनमनं
रचयेम संस्कृतकवनम् ।।३।।

## ।। मैत्रीपञ्चकम् ।।

साहाय्यदं विनाऽपेक्षां सर्वकालेषु यः सखा ।
उदारचरितं नित्यं तन्मित्रं बुध्यते जनैः ।।१।।
दृढं सख्यं च पावित्र्यं सुखदुःखेऽपि बन्धनम् ।
एतेषामेव रक्षार्थं मित्रसूत्रं च बध्यते ।।२।।
आद्वाविंशति वयसो नित्यं रक्ष्या च मित्रता ।
तस्मादेवानन्तरं हि वरो लभ्यः सुमेधया ।।३।।
आनन्दश्च सुखं वृद्धिः चाधार: शान्तिरेव च ।
मैत्र्या हि प्राप्यते सर्वं तस्मान्मैत्री गरीयसी ।।४।।
जगति वर्धतां मैत्र्यं विसृज्य शत्रुतां मुदा ।
परस्परसाहाय्येन स्वर्गं निर्माम भूतले ।।५।।

## ।। योगपञ्चकम् ।।

योगेनैव तु चित्तस्य मलं निर्याति कश्मलम् ।
शरीरे प्राप्यते शक्तिः तस्माद्योगं समाश्रयेत् ।।१।।
कायायां मनसि वाचि शुद्धता त्रयमिच्छसि ।
योगेन लभ्यते सर्वं तस्माद्योगं समाश्रयेत् ।।२।।
दीर्घायुत्वं चिरं सौख्यं विजयः षड्रिपूपरि ।
नाडीशुद्धिश्च शक्यन्ते तस्माद्योगं समाश्रयेत् ।।३।।
बुद्धिशक्तिः कार्यशक्तिर्मनःशक्तिस्तथैव च ।
योगाभ्यासेन वर्धन्ते तस्माद्योगं समाश्रयेत् ।।४।।
राजहठादियोगश्च कुण्डलिन्याश्च जागृति: ।
कार्यारम्भस्तु चक्राणां तस्माद्योगं समाश्रयेत् ।।५।।

## ।। वाचनपञ्चकम् ।।

नित्यं सद्यस्कज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधावबोधाय वाचनमुपकारकम् ।।१।।
मस्तके पुस्तकान्येव पत्रेष्वायान्ति मस्तकात् ।
तस्माद्ग्रन्थालयं नित्यं गच्छेच्छात्रो दिने दिने ।।२।।
ग्रन्थालये वापि देवालये वा
विद्यालयेवापि गेहे प्रवासे ।
एवं च वैविध्यस्थानेषु नित्यं
वाच्यं सदा ज्ञानगम्यैश्च शिष्यैः ।।३।।
ग्रन्थालये तथा गेहे विद्यालयेऽपि मन्दिरे ।
एवं विविधस्थानेषु छात्रो वाचनमाश्रयेत् ।।४।।
सर्वे भवन्तु वाचकाः वाचनेनैव पण्डिताः ।
पाण्डित्याल्लभतां मानो मानो भूयाच्च सौख्यदः ।।५।।

## ।। जपमाहात्म्यम् ।।

माङ्गल्यं च सुखं शान्तिः शुद्धिश्च पूतमानसम् ।
जपेन लभ्यते सर्वं तस्माज्जपं समाश्रयेत् ।।१।।
उत्साहो वर्धते कार्ये एकाग्रता तथैव च ।
सामर्थ्यं मनसश्चैव तस्माज्जपं समाश्रयेत् ।।२।।
ईश्वरस्य जपेन्नाम मुखेनोच्चैश्च मानवः ।
स्पन्दमानेन नाम्नैव कण्ठो भवति रक्षितः ।।३।।
प्रादुर्भावो विषाणूनां यदि जातो महीतले ।
'विष्णु'मेव जपेन्नित्यं 'विषाणु'नाशनाय तु ।।४।।

**उक्तं च -**

'रा'कारोच्चारमात्रेण मुखान्निर्याति पातकम् ।
पुनःप्रवेशसन्देहे 'म'कारस्तत्कपाटवत्।।
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ।।
कण्ठे एव म्रियन्ते ते प्रविष्टाश्चेद्विषाणवः।
ओङ्कारमथ सश्रद्धं जपेन्नामेश्वरस्य च।।५।।
बहुभिः सिद्धमन्त्रैश्च देवनामजपादिभिः ।
होमयागादिकार्यैश्च नङ्क्ष्यन्ति ते विषाणवः ।।६।।
तुकारामादिसन्तोऽपि वारं वारं वदन्ति च ।
कलावस्मिन् भवेन्नूनं भगवन्नाम तारकम् ।।७।।
भगवतो वदामीह पुण्यदं पापनाशकम् ।
नीरोगजीवनायैव नाम जप्यं नरैर्भुवि ।।८।।
।। इति श्रीहरिविरचितं जपमाहात्म्यं सम्पूर्णम् ।।

## ।। श्रुतिलयः ।।

कृतिमयः स्मृतिमयः सर्वानन्दं सुप्रदः ।
पीठमाविष्करणायैव भवेच्चायं श्रुतिलयः ।।१।।
संगीते संजीवनाय संगीतेनोद्धाराय ।
संगीते निमज्जनाय भवेच्चायं श्रुतिलयः।।२।।
जयं नाट्यं जयं काव्यं वाद्यं जयः श्रुतिलयः ।
विश्वंजयो हृदयंजयः सम्पज्जयः श्रुतिलयः ।।३।।

## ।। मासेषु ऋतवः ।।

ऋतुत्रयं विदेशेषु फ्रान्स्देशे तच्चतुष्टयम् ।
भारते ऋतुषट्कं तु ज्ञातव्यं सर्वविज्जनैः ।।१।।
वसन्त ऋतुराजश्च चैत्रवैशाखमासयोः ।
ग्रीष्मो निदाघकालः सः आषाढज्येष्ठमासयोः ।।२।।
श्रावणे भद्रमासे च वर्षाकालः कृषिप्रियः ।
आश्विने कार्तिके मासे शरत्कालः सुमप्रियः ।।३।।
मार्गशीर्षे च पौषे च हेमन्तर्तुः सुशीतलः ।
माघे फाल्गुनमासे च शिशिरः पर्णपातकः ।।४।।
एतानि मासनामानि ऋतुनामानि भारत ।
त्वयैव चावधेयानि नित्यं नित्यं न संशयः ।।५।।



## ।। उत्तमयुवको भवामि नित्यम् ।।

प्रातःकाले उत्थायाहं

देवगुरूणां कृत्वा स्मरणम् ।

विशुद्ध्य वाणीं चित्तं देहं

करोमि कार्यं मनसा सकलम् ।।१।।

दृष्ट्वा सृष्टिं नीलं गगनं

तरूंश्च सत्त्वान्नद्या नीरम् ।

श्रुत्वा नादं पक्षिगणानां

भवामि सन्तुष्टाऽहं सततम्

(भवामि सन्तुष्टोऽहं सततम् )।।२।।

शालां गत्वा अधीत्य सर्वं

सदैव स्मृत्वा गद्यं पद्यम् ।

क्रीडायोगाभ्यासैरेव

नूनं हर्षं यामि सदैव ।।३।।

सायङ्काले गृहमागम्य

कृत्वाभ्यासं भुक्त्वा अन्नम् ।

ज्येष्ठजनानां सेवां कृत्वा

उत्तमयुवती भवामि नित्यम्

(उत्तमयुवको भवामि नित्यम् )।।४।।

## कीदृशं देशवन्दनम्?

मराठादलिता वैश्याः शूद्रा वा क्षत्रिया द्विजाः ।
ऐक्यभावो न चेज्ज्ञातः कीदृशं देशवन्दनम्? ॥१॥

सर्वाः प्रदूषिता नद्यो दूषितं जलजीवनम् ।
सृष्टेर्विनाशमालेयं तथापि देशवन्दनम्? ॥२॥

हत्या कृषीवलानां च नारीबाला अरक्षिताः ।
सामान्या दलिता एव कथं भारतवन्दनम्? ॥३॥

देशस्योन्नयनं कार्यं साम्यभावेन सर्वदा ।
सैनिका इव सीमायां तद्धि भारतवन्दनम् ॥४॥

## ॥ प्रहेलिका: ॥

न कस्यापि जाया तथापि च जाया
अनन्या हयजाया परा सा हि जाया ।
उभे ते यदा लब्धमातृत्वरूपं
सुदैवेन युक्ता परा दैवभुक्ता ॥१॥

(पार्वतीकुन्ती)

काले काले नवो नित्यं लिखित्वा काव्यसप्तकम् ।
दासीकृतं जगत्सर्वं सम्मान्यं प्रणमाम्यहम् ॥२॥

## ।। समस्यापूर्तिः ।।

भग्नो मे श्रावणः प्रायो मांसाहारो भवेद्यदि ।
इति मत्वा भयाच्छीघ्रं मृगात् सिंहः पलायते ।। १।।

सदृशं सलमानेन कारायां जीवनं भवेत् ।
इति मत्वा ध्रुवं भीतो मृगात् सिंहः पलायते ।। २ ।।

कलौ नारी भवेद्व्याघ्री नरश्च वृषभः खलु ।
अतस्त्यक्त्वा वक्रदृष्टिं धेनोर्व्याघ्रः पलायते ।। ३ ।।

जाया हि भूता न तथापि जाया
सूतिं विना कौ जनितौ शिवा याः ।
रामस्य पत्न्या खलु नाशितौ कौ
कुन्तीसुतौ रावणकुम्भकर्णौ ।। ४ ।।

आद्यं महाभारतनायकौ तौ
रामायणस्य प्रतिनायकौ च ।
एकेन पादेन यद्युत्तरं चेत्
कुन्तीसुतौ रावणकुम्भकर्णौ ।। ५ ।।

कौन्तेयमाता तनुजौ जनैश्च
पौलस्त्यराजन्कलशध्वनेर्गौः ।
पर्यायशब्दा युगपद्धि सूक्ताः
कुन्ती सुतौ रावण कुम्भकर्णौ ।। ६ ।।

यदा मे वयस्येन ह्यादिष्ट एव
सुरां शीघ्रमानीय गेहे पिबावः ।
न लब्धा सुरासौ विना वस्त्रकोशं
तदा सञ्चिकां प्लास्टिकां तां स्मरामि ।। ७ ।।

कथं रक्षणीयं मया पर्पटादि
कथं वा प्रवासे च वम्यं नरेण ।
कथमानयानि झषान् मेऽतिचिन्ता
तदा सञ्चिकां प्लास्टिकां तां स्मरामि ॥ ८ ॥

## ॥ ठण् ठण् पपम् पम् छछछञ् टटण् टः ॥

रामाभिषेके जलमाहरन्त्या
हस्ताच्च्युतो हेमघटो युवत्याः ।
सोपानमार्गेण करोति शब्दं
ठण् ठण् ठ ठण् ठण् ठ ठ ठण् ठ ठण् ठः ॥

कालिदासः

यदाग्रयाने जनसंकुले हि
मार्गे निरुद्धप्रसरं न याति ।
करोति शब्दं खलु पृष्ठयानं
पम् पम् प पम् पम् प प पम् प पम् पः ॥

म.म. खरवंडीकरवर्याः

रात्रौ भ्रमन् शून्यलोकाभिमार्गं
भीत्यैव कम्पायमानो भवामि ।
तदा शुभ्रवस्त्राकृतिर्नृत्यति भोः
छञ् छञ् छ छञ् छञ् छ छ छञ् छ छञ् छः ॥

श्रीहरिः

यदातीव धूमेन व्याप्तं महालं
तदा रक्षका उत्पतन्तीव याने ।
झटित्येव यात्यग्नियानं हि कृत्वा
टण् टण् ट टण् टण् ट ट टण् ट टण् टः ॥

श्रीहरिः

# ।। वृत्तबद्धपद्यानि ।।

## मन्दाक्रान्ता

मन्दाक्रान्ता प्रथमगुरुणा कालिदासेन युक्ता
तां जानीयाच्च तु शिखरिणीं सद्गुरुश्चेत्तृतीयः ।
पृथ्वी ज्ञेया विबुधमनसा लाघवस्तत्तृतीये
बालानां तत्सरलगमने पातु वो विष्णुपादः ।।

## वसन्ततिलका

अन्तस्स्वनादिमननादहृदयं हि पूर्णम्
मालिन्यभावदहनाद्गतकोपभावः ।
कामादिसर्वशमनान्नवजन्म लब्धं
किं किं न यच्छति परा गुरुदेवदीक्षा ।।

## मन्दाक्रान्ता

कश्चित्सारं पिबति रमते काव्यगङ्गातटेषु
कश्चिन्मग्नो भवति तरले निर्मले तत्प्रवाहे ।
कश्चित्तस्या हिमनगभवं गर्भसत्त्वं हि वेत्ति
वन्देऽहं तान्कविवरजनान्भारतीसेवमानान् ।।

## शिखरिणी

स्मितं हास्यं नानामुखजबहुभावांश्च तरलम्
अधीरोऽहं दृष्ट्वा सरसकमनीयां सहृदयम् ।
तया सार्धं गत्वा मदनशरहन्ताऽभवमहम्
अहो कामस्यैवं गतिरगतिकं मां च कुरुते ।।

### शिखरिणी

मुदा बुद्ध्या सत्यं निखिलसरलं सिन्धुजमतं
विवेकेनैवं तत्परिषदि मधु स्थापितमिदम् ।
जनैर्मान्यं सर्वं सरसगहनं ज्ञापितमिदं
विवेकानन्दं तं प्रतिदिनमहं नौमि सततम् ।।

### पृथ्वी

हतं सकलजीवनं भवनमार्गवृक्षादिकं
निराशभयपश्यतो मम हि मानसं व्याकुलम् ।
तदा जलमयीं नदीं प्रविशता हि दृष्टं मया
स्वजीवनगतिः खलु स्वकृतकर्मणा लभ्यते ।।

### शार्दूलविक्रीडितम्

आयातान्बहुनीरदान्सचपलान् ह्याकाशमार्गेण तान्
दृष्ट्वा कोमलचञ्चलादिनयना हर्षंगता सत्वरम् ।
द्वारे तत्पतिदर्शनेन कथितं साधीरवाण्या तया
नाथ त्वां हि विना कथं प्रिय रमे, कामेन का मे गतिः।।
नाथ त्वां हि विना कथं प्रिय रमे, कामे न का मे गतिः।।
नाथ त्वां हि विना कथं प्रिय रमे, कामेन कामे गतिः।।

## ।। तव सौन्दर्यम् ।।

(संस्कृतगझल)

नयने द्वे ते मदिराधारे
नित्यं वहति प्रेमसुधा रे ।
स्थिरदृष्ट्या तेऽस्थिरचित्तं मे
पानेनोड्डयते आकाशे ।।१।।

अमृतकुम्भो ननु ते अधरं
नेच्छामि तम् अमृतकुम्भम् ।
तद्रसपानम् आकण्ठं भोः
करोमि स्वप्ने वारं वारम् ।।२।।

विलसत्यत्र च ते मुखचन्द्रं
केशानां तिमिरे उज्ज्वलितम् ।
दृष्ट्वा ते सौन्दर्यमतुल्यं
नेच्छा द्रष्टुं शशिसौन्दर्यम् ।।३।।

कदाऽयास्यसि चित्रस्था त्वं
कथं व्यथा मे ते कथयेऽहम् ।
नेत्रकटाक्षैर्नयनशरैश्च
हृदयं मे चालनीव जातम् ।।४।।

त्वं वससि मे काये मुग्धे
मे प्राणो वसति च ते हृदये ।
तव स्पर्शेन सहवासेन
कदा च लप्स्ये नवसंजीवम् ।।५।।

## ।। हृत्प्रेम ।।

**(संस्कृतगझल)**

लालिमया तेऽधररागानां
हृदयं मे खलु जातहर्षितम् ।
शाखाभिः कोमलबाहूनां
हृदयं मे त्वां प्रति आकृष्टम् ।। १ ।।

पवमानोऽयं वहति मृदुतया
परिमल आनीतस्ते मदर्थम् ।
दण्डनीयः स तु पवनोऽयं
स्पृष्टा प्रथमं तेन किमर्थम्? ।। २ ।।

मनसि गतान् भावान् विज्ञाय
बहुधा बहुबाहून्मे समर्प्य ।
नैकहेममालाभिः कान्ते
कान्तं मां त्वं स्वीकुरु शीघ्रम् ।। ३ ।।



## ।। सखि त्वम् ।।

### (संस्कृतगझल)

चन्द्रिका मे मानसे रे ते स्मृतीनां प्रश्रिता ।
त्रियामायामेकाकिनि सति त्वं नोपस्थिता ।। १ ।।
चन्द्रिका मे...

स्मरामि मधुमासं तं भोजयन्तावास्व रे ।
त्यक्तमन्नादीह सर्वं सखि त्वं नोपस्थिता ।। २ ।।
चन्द्रिका मे ...

मया वर्णोत्सवे त्वं वै नैकवर्णेषु रञ्जिता ।
वर्णहस्तः प्रतीक्षेऽहं सखि त्वं नोपस्थिता ।। ३ ।।
चन्द्रिका मे ...

परिमलः कायस्य तेऽयं प्रसृतश्च दिगन्तरे ।
सुगन्धो मे प्राणबन्धः सखि त्वय्यनुपस्थिते ।। ४ ।।
चन्द्रिका मे ...

गृहीता बाहुद्वयेन अधरपानार्थं मुदा ।
कथं बाहुद्वये लुप्ता सखि क्व रे त्वं गता ।।
नेत्रमार्गेण प्रिये मे सखि त्वं हृदयंगता ।। ५ ।।
चन्द्रिका मे ...

लभे संजीवनं नित्यं स्पर्शमात्रेण प्रिये ।
तत्सुखाय च धरे देहं सखि त्वय्यनुपस्थिते ।। ६ ।।
चन्द्रिका मे ...

विरहकालो न सह्योऽयं दक्षिणे स्थितोऽधुना ।
वहन्त्यश्रूणि तथापि सखि त्वं नोपस्थिता ।। ७ ।।
चन्द्रिका मे ...

स्मर्यते धृतशाटिका ते स्पृष्टा खलु वायुना ।
अतोऽवरुद्धस्स हृद्येव सखि त्वं नोपस्थिता ।। ८ ।।
चन्द्रिका मे ...

गते संवत्सरे शीघ्रम् एष्यामि च त्वां प्रति ।
यास्यामि सुखं वीक्ष्य सखि त्वां चोपस्थिताम् ।। ९ ।।
चन्द्रिका मे ...

## भवती मामकी ।

हे प्रिये प्रियतमे एहि मे जीवनम् ।
शृणु मे वाणीं सत्यपूर्णां
भवती मामकी ।।

नैव तु याहि रे एवम् , आयाहि जीवनम् ।
शक्यं मे खलु नैव , त्वद्विना जीवनम्
सत्यं रे वदामि , भव त्वं मामकी ।।

आनेष्यामि सौख्यम् , हर्षं ते जीवने
नैव भवेद्विवादो , भवेत्सदा स्नेहो
निश्चयेन वदामि, त्वमसि रे मामकी ।।

हृदयं मे तव सदनम् , तत्र वससि सततम्
स्पन्दति त्वद्गन्धेन, हृदयं मे सततम्
तव रे आगमेन, पूर्णं जीवनम् ।।

## दृष्टा शकटी सा ।

अयि.. मनसि
दिवा.. भुञ्जे भुञ्जे ।
सा माता मम दिवा रात्रौ मां ब्रूते ।
नैव सदैव खाद त्वं भोजनालये ।
खे ननु कथमपि स विहङ्गो रमते ।
तथैव चित्तं रमते बहिस्स्थे भोजने ।

मे खलु आलुवटकं रोचते ।
रसगोलकः खलु रोचते ।
मधु खाद्यमेतत् जीवो हि तु खलु पुंसो
हा याहि न क्व इतोऽभुक्त्वा ।
फलरसान् तु पिब अथ वा ।
खाद मूलफलानि त्वं शीघ्रम् ।

दृष्टा शकटी सा ।
बहुखाद्यपदार्थान् दृष्ट्वा
श्रीखण्डपूरिका गृहीता ।
कुण्डलिका अपि बहु च भुक्ता ।।

दृष्टा शकटी सा ।
कुर्कुरिका अपि मया च भुक्ता ।
जलपूरिका मया भुक्ता ।
वटिकरोटिका अपि क्व रे लुप्ता?

न जाने न जाने किं च मे खादनीयम्?
नैव कस्मै हि देयम् ।
सकलमपि चाशनीयम् ।
खादनीयम् भोजनीयम् ।

पश्य रे पश्य रे पश्य आलुकम् ।
पश्य रे मधुरालुकम् ।
पश्य रे श्यामालुकम् ।
पश्य रे तन्मूलकम् ।
खादाम रे खादाम अधुना रे रे किम् किम्?
पिबाम रे पिबाम अधुना रे रे किम् किम्?
बुभुक्षा बहु मे अधुना अस्ति मध्याह्ने ।
अत्र तत्र अटामि किमर्थमस्मिन्नुद्याने ।
धनमपि नास्ति किमपि मम नास्ति ।
पितुर्वित्तकोषेऽपि किमपि मम नास्ति ।

आनीत आनीतो लड्डुक आनीतः ।
पीयूषः अधुना स पीतो हि पीतः ।
आनीता सर्वा आनीता गव्या ।
एतानि च खाद्यानि न ते देयानि ।
दृष्टा शकटी सा ।

-----

## ध्रुवा-महोत्सव-शीर्षकगीतम् ।

सिद्धं मम सैन्यम् ।
हृदयेऽपि च धैर्यम् ।
काया खलु सिद्धा मे रे
क्रीडनार्थम् ।

अयनं तव नूनम्
प्रत्यूहैर्युक्तम् ।
क्रीडाभिर्निर्मामस्तद् मोदपूर्णम् ।

ध्रुवा ध्रुवा
भवेत्संस्कृतेन क्रीडा ।
ध्रुवा ध्रुवा
क्रीडया च संस्कृतम् ।।१।।

ध्रुवा ध्रुवा
आबालबुद्धमहिलासुसिद्धपात्रम् ।
ध्रुवा ध्रुवा
उत्साहकुण्डपूर्णम् ।

ध्रुवा ध्रुवा
हृद्यादरश्च विश्वस्थक्रीडकेषु ।
ध्रुवा ध्रुवा
चल रे च क्रीडनार्थम् ।

ध्रुवा ध्रुवा
भवेत्संस्कृतेन क्रीडा ।
ध्रुवा ध्रुवा
क्रीडया च संस्कृतम् ।।२।।

## ।। मङ्गलाष्टकम् ।।

वन्देऽहं कुलनायकं गणपतिं सर्वेश्वरं बुद्धिदम्
वन्दे तां कुलदेवतां च जननीं सर्वात्मिकां रेणुकाम् (भास्वराम्)।
काले तौ भवतां गृहे सुखवरौ चानन्ददौ सौख्यदौ
युग्मं वां शुभगेहजीवनकरं कुर्यात्सदा मङ्गलम् ।।१।।

श्रद्धाकर्मकरी गृहस्थितजनैः सार्धं सुसंवादिनी
बाह्ये कार्यकरी च धर्मलसिता सम्पत्तिसम्पादिनी ।
वात्सल्येन सदा स्थिता प्रियकरी चित्ते प्रसन्नावलिर्
गार्हस्थ्ये ह्यनयोर्युतिश्शुभकरी कुर्याच्च वां मङ्गलम् ।।२।।

सद्यस्का तनया मुदा बहुकृतिर्गेहेऽपि कार्यङ्करी
नित्या संगणके रता खलु वरा कौटुम्बसौख्ये परा ।
भर्त्रे सा सुखदायिनी महदहो गेहस्य या स्वामिनी
गार्हस्थ्ये यदि पूजयन् स तु वधूं कुर्याच्च सा मङ्गलम् ।।३।।

आनन्दः सुखसम्पदो निजगृहे नित्यं तथा मानसे
सर्वे यच्छतु चादरं बहुविधं चैतन्मनोमेलनम् ।
नव्या सा खलु सर्वरागधनिनी वाञ्छा मुदा स्वागते
तस्या स्वागमनेन दिव्यगणः कुर्यात् सदा मङ्गलम् ।।४।।

माता यां सुपरीव पालितवती पित्रापि या लालिता
बन्धोर्या प्रथमा सखी च भगिनी (यया) गेहं शिरस्युद्धृतम् ।
हृद्खण्डमधुना ददे तव करे चाश्वस्य त्वां निर्मलं

भाव्यं ते सकलं कुलं च सुखदं भूयात् सदा मङ्गलम् ।।५।।

विज्ञाने सकलं जगद्बहुरतं कामेऽपि तच्चाखिलं
ज्ञानं संस्कृतिजन्यमत्र निखिलं चापेक्षितं मानदम् ।
शक्त्याराधनया भवन्तु सबलाः कन्यास्सदा भारते
श्रीरामा इव सर्वभारतनराः कुर्वन्तु वां मङ्गलम् ।।६।।

सुज्ञास्ते खलु वीरसैनिकगणा रक्षन्ति देशं वरम्
सह्यन्ते बहुतापकष्टविविधान्याजन्म सीमोपरि ।
तेषां जीवनधन्यजातमहो राष्ट्रे सुशान्त्यै श्रिये
एतेषां शुभशंसनैर्बहुविधैर्भूयाच्च वां मङ्गलम् ।।७।।

श्वश्रूस्ते भवतु प्रियेव जननी देवापि बन्धुर्नवः
तातस्ते श्वशुरो भवेच्च भगिनी पत्युर्भवेत्ते सखी ।
सर्वे ज्ञातिजनाश्च ये बहुविधाः प्रेम्णैव तिष्ठन्तु ते
स्वर्गस्थाः सकलाः सुरासुरगणाः कुर्वन्तु वां मङ्गलम् ।।८।।



## ।। ते विवाहार्थम् ।।

अयं विधिर्विवाहस्य सौख्यमङ्गलकारकः ।
गणेशस्य प्रसादेन कार्यसिद्धिर्भवेदिति ।।१।।

संस्कृतस्य च गीतस्य मिलापो हि भवेत्कदा ।
इति मत्वा दर्शनाय आयास्यन्ति दिवौकसः ।।२।।

स्वर्गे भुवि स्थिता देवा आगमिष्यन्ति मण्डपे ।
सङ्गीतसंस्कृतं प्रायो न भूतो न भविष्यति ।।३।।

गीतं हि शोभते नित्यं प्रियस्य ते मुखे यथा ।
तथैव संस्कृता वाणी तव कण्ठे विराजते ।।४।।

हेऽनघ त्वं सृष्टिकर्ता पूरय जनवाञ्छनाः ।
क्लृप्तिमात्रेण ते बाढं मङ्गलं तनुयादिह ।।५।।

कवनं पञ्चकमिदं तव प्रीत्यर्थमेव हि ।
विवाहार्थं शुभाशंसाः प्रेषयामो मुदा वयम् ।।६।।

## ।। अपूर्वानचिकेतसौ ।।



संस्कृतिर्भारतस्येयं विश्वेऽस्मिन् बहुमानिता ।
सम्प्रति नैकदेशेषु रक्षिता साऽप्यपेक्षिता ।।१।।
संस्कृतं संस्कृतेर्मूलं संस्कृतिः संस्कृताश्रिता।
संस्कृतस्य च संस्कृतेः सुबन्धोऽनादिकालतः ।।२।।
संस्कृती रक्षिता नित्यं प्रयुक्ता नचिकेतसा ।
अपूर्वाया मुखे सत्यं संस्कृता वाग्विराजते ।।३।।
अपूर्वो दृढबन्धोऽयं भूयाज्जन्मनि जन्मनि ।
वितरन्तु शिवं देवाः अपूर्वानचिकेतसोः ।।४।।
आशीर्वादैश्च ज्येष्ठानां मित्राणां शुभशंसनैः ।
उभौ हि भवतां नित्यं भाषासंस्कृतिरक्षकौ ।।५।।

## ।। वृत्तनिवेदनम् ।।

### २१ दिनात्मकं पाण्डुलिपिविज्ञानं तथा पुरालिपिविज्ञानविषयिकी कार्यशाला ।
### (११ ऑक्टोबरतः ३१ ऑक्टोबर २०१९)

गुरुवायुरिति स्थानं त्रिशूरं केरलस्थितम् ।
देवानां पुण्यभूमिं च वन्दामहे पुनः पुनः ।।

'नमामि' संस्थया तत्र संस्थानेनापि योजितम् ।
विंशत्येकदिनान्यावत् कार्यशाला खलूत्तमा ।।

पाण्डुलिप्याः पुरालिप्याः किञ्चिज्ज्ञानं भवेदतः ।
आगता बहुप्रान्तेभ्य आचार्यच्छात्रशोधकाः ।।

पाठिता अनुबन्धाश्च पाठसंशोधनं तथा ।
केशवनिधिवर्यैस्तु नमामस्तानतो वयम् ।।

पुरा लोका भारतीया न जानन्ति स्म लेखनम् ।
इति केषांचिद्विचारो मौखिकं तस्य कारणम् ||

अस्माकं गुरुवर्येण मुरलीमाधवेन सः |
विचारो भेदितोऽस्माकं सप्रमाणं च लीलया ||

केवलं धन्यवादास्तु नात्र योग्या भवन्त्यतः |
नमामो गुरुवर्यं तं मुरलीमाधवं सदा ||

यस्योत्तमं लिपिज्ञानं ब्राह्मी वा शारदापि वा |
पाण्डुलिपिविषयकं द्वारमुद्घाटितं बृहद् ||

सुस्वभावी सुशीलो य उत्तम: शिक्षकस्तथा |
अस्माकं गुरुवर्यं तम् उत्तमं च नुमो वयम् ||

दक्षिणे च स्थितं रत्नं नैकरत्नेषु शोभते |
देशस्य चाभिमान: स आश्रमो देशमङ्गलम् ||

नैकग्रन्था नैकव्याख्या न जाने रचिता: कति |
अद्यापि चोपलब्धास्ते छात्रसंशोधनाय च ||

परिचाययितं येन कुटुम्बं देशमङ्गलम् |
अस्माकं गुरुवर्यं तं प्रणमामो नटेश्वरम् ||

येन दत्ता हि छात्रेभ्यो दृष्टि: संशोधिका परा |
नमामस्तं गुरुवर्यं मुरलीमाधवं मुदा ||

सङ्गणकोपयोगश्च कर्तव्य: साधुशोधकै: |
सम्भाषणे स कुशलो नम्यो गिरिधरः सदा ||

या देवी ग्रन्थरूपेण छात्रहस्तेषु चागता |
अहो भाग्यं महद्भाग्यम् अत्र प्रकटिता हि सा ||

वर्गे सरस्वती साक्षात् माता वर्गाद्बहिश्च सा |
वात्सल्यप्रेममूर्तिर्या छात्राणां हृदये सदा ||

स्वयं ग्रन्थलिपिं ज्ञात्वा ग्रन्थलक्षाधिकाश्चिताः |
सूक्ष्माक्षीं तां विशालाक्षीं प्रणमामो गुरुं वराम् ||

नैकविधास्ति सा ब्राह्मी शिलायां नैकरूपिणी ।
दर्शिता गुरुवर्येण राघवार्यं नुमो वयम् ॥

षष्ट्यब्दकार्यं खलु ध्येयपूर्णं
दृढात्मविश्वासबुद्धिप्रभास्ते ।
ज्ञानेन ते सर्वशिष्याश्च तृप्ता
उन्नीतजाताश्च उन्नीवरेण ॥

ज्ञानवृद्धं तपोवृद्धं वयोज्येष्ठं तथैव च ।
अनुभवेन सम्पन्नम् उन्नीवर्यं नुमः सदा ॥

अशोकेनेव कर्तव्यं छात्रैः संशोधनं खलु ।
गुणास्ते स्वानुभवेन कथिता येन प्रेरिताः ॥
प्रगताध्ययनायैव प्रगतकार्यसिद्धये ।
अस्माकं तं गुरुवर्यं नीलकण्ठं नुमो वयम् ॥

तञ्जावुरस्थितः सोऽयं सरस्वतीमहालयः ।
देशस्य पाण्डुपत्राणामाकरः खलु वर्तते ॥

तत्र पुराग्रन्थराशिर्नैकभाषासु विद्यते ।
तस्या रक्षा भवन्त्यत्र स्वच्छतापि च शोधनम् ॥

पाण्डुलिपिप्रकाराश्च विदेशे कार्यपद्धतिः ।
पाठिता मुक्तकण्ठेन तेन वयं प्रभाविताः ॥

पाण्डुलिप्याश्च रक्षायै सदैव स कटिबद्धः ।
अस्माकं तं गुरुवर्यं पेरुमलं नुमो वयम् ॥

एतैरनुभवैर्नैकैः सर्वे प्रेरितहर्षिताः ।
भोजनादिव्यवस्थाभिः सर्वे आनन्दिताः खलु ॥

धन्यवादान् प्रयच्छाम इदानीं मोदितक्षणे ।
विश्वनाथगुरुं चैव धनेशं राधिकां प्रति ॥

आनन्दं विजयानन्दं राजीवं मोहनं प्रति ।
रम्यां च निखिलं चैव धन्यवादांश्च दद्महे ॥

संस्थानं च नमामिं च प्रार्थनां कुर्महे वयम् ।
मिलित्वा कुरुतां कार्यं राष्ट्रवृद्ध्यैक्यसिद्धये ॥

-----



## ।। धन्यास्ते राष्ट्रसेवकाः ।।

महासङ्कटकालेऽस्मिन् दुःखमग्ना वसुन्धरा ।
दृष्ट्वा मानवसंहारं विषाणुस्तत्र कारणम् ।।१।।
प्रसारोऽयं विषाणूनां मानवैरेव शक्यते ।
युगेऽस्मिन् मानवा एव जाताः स्वप्राणघातकाः ।।२।।
ये त्यजन्ति बहिर्यानं तिष्ठन्ति ये गृहे सदा ।
नियमान् पालयन्त्येव ते वै स्वप्राणरक्षकाः ।।३।।
परप्राणरक्षकास्ते नूनं राष्ट्रस्य सेवकाः ।
एवं नैव विषाणूनां प्रसारो जगतीतले ।।४।।
विश्वे तथापि दृश्यन्ते विषाणुबाधिता जनाः ।
दिने दिने च वर्धन्ते नैके मृत्युंगतास्तथा ।।५।।
न्यूनीकर्तुं प्रसारोऽयं वैद्याश्च परिसेवकाः ।
आरक्षका अहोरात्रं कार्यं कुर्वन्ति स्वस्थले ।।६।।
जनानां जीवनायैव स्वप्राणान् गणयन्ति न ।
कटिबद्धाः स्वकार्यार्थं धन्यास्ते राष्ट्रसेवकाः ।।७।।
शासनादाप्तकार्यं ये कुर्वन्ति दृढनिष्ठया ।
देशबन्धुहितायैव धन्यास्ते राष्ट्रसेवकाः।।८।।
गृहान्नरक्तभूवित्तभवनश्रमदायिनः ।
सद्यः स्वदेशरक्षायै धन्यास्ते राष्ट्रसेवकाः ।।९।।
आद्यं राष्ट्रहितं येषां ये राष्ट्रहितकारिणः ।
विश्वहितं च तत्रैव धन्यास्ते विश्वसेवकाः ।।१०।।

-----

## ।। सुखम्भरा वसुन्धरा ।।

### सूत्रधार उवाच ।

प्राप्ता प्रजापतिं त्रस्ता धेनुरूपा वसुन्धरा ।
नत्वा तमाह मे देव कष्टदं मम जीवनम् ।

### ब्रह्मा उवाच ।

मया तु खलु संसृष्टा सुजला सुफला धरे ।
पालिता विष्णुना त्वं च बहुरत्ने वसुन्धरे ।।
निर्मला निम्नगा नीला हरिता प्रकृतिस्तव ।
कूजनं पक्षिणां तत्र पशूनां हिण्डनं मुदा ।।
सर्वेषामपि संस्थित्यै सिद्धता हि कृता त्वया ।
निर्जीवा वा सजीवापि सर्वेऽपि तव कुक्षिजाः ।।
सानन्दं ते मिलित्वैव सादरं च परस्परैः ।
सुहृद्भूत्वा सकामं ते रक्षेयुश्च परस्परान् ।।
मानवानां च दायित्वं बृहदस्तीति मे मतम् ।
यतो हि बुद्धिसम्पन्नाः निर्माणक्षममानवाः ।।

### वसुधोवाच ।

ग्रसितास्ते कलौ देव लोभद्वेषादिराक्षसैः ।
बहुशोऽनुचरन्त्येव मनुजा दनुजा इव ।।
दुःशीलैर्दुजनैरेव पीडिता प्रकृतिर्मम ।
अद्रिपशुखगास्त्रस्ताः दुःखमग्नः सरित्पतिः ।।
दुर्जनैस्तैरिदानीं तु हत्याचक्रं प्रवर्तितम् ।
साहाय्येन विषाणूनां विना शस्त्रं विना बलम् ।।

नैकेऽनघाश्च पुत्रा मे कवलिताश्च मृत्युना ।
पुत्राणां हननं दृष्ट्वा मग्नाऽहं दुःखसागरे ॥
भविष्यं मे तमोव्याप्तं निर्मनुष्या भवानि वा ।
सचिन्तायै दर्शयेह त्वमेव शरणं मम ॥

### ब्रह्मा उवाच ।

दूरीकर्तुं दुःखमेतन्नारायणागमो भवेत् ।
हृदये सज्जनानां च भूमे चिन्तामतस्त्यज ॥
वैद्याश्चारक्षकाश्चैव परिचारगणास्तथा ।
स्वच्छतारक्षकाश्चापि नैके ते जनसेवकाः ॥
एते विषाणुयोद्धारो बान्धवजीवनाय ते ।
स्वप्राणान् गणयन्तो न कुर्वन्ति परिवेषणाम् ॥
देशसेवां प्रजासेवां कुर्वन्तस्ते दिवानिशम् ।
वारं वारं च वन्द्यास्ते सर्वे राष्ट्रस्य सेवकाः ॥
दुःशीला दुर्जना नित्यं प्रतीकार्याश्च दण्डनैः ।
शासकैर्देशरक्षायै धर्मसंस्थापनाय च ॥
भवेयुः सुखिनः सर्वे सजीवाः पशुपक्षिणः।
भविष्यन्ति मानवा हि सुशीलाः सर्वरक्षकाः ॥

### सूत्रधार उवाच ।

श्रुत्वा ब्रह्मणो वाणीं हर्षंगता वसुन्धरा ।
मनुजैरैव निर्भया सुखम्भरा वसुन्धरा ॥

------

॥ श्रीः ॥

## ॥ छन्दोदेवादिसंग्रहः ॥

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥
(स्कन्दपुराणम् )

नत्वा गुरून् पालकांश्च कोषकारादिपण्डितान् ।
छात्राणां सुखबोधाय छन्दोदेवादिसंग्रहः ॥
गोकर्णकरपुत्रेण वासुदेवेन पालितः ।
कण्ठस्थीकरणायैव सस्थानर्षि च लिख्यते ॥

| अनुक्रमांकः | देवतादिः | स्थानम् | ऋषिः | ऋचां संख्याः |
|---|---|---|---|---|
| १ | इन्द्रः | अन्तरिक्षम् | गृत्समद् | २५० |
| २ | अग्निः | पृथ्वी | मधुच्छन्दा | २०० |
| ३ | सोमः | पृथ्वी | कण्वः | १५० |
| ४ | अश्विनौ | द्युः | कक्षीवान् | ५० |
| ५ | उषस् | द्युः | वसिष्ठः | २० |
| ६ | वरुणः | द्युः | शुनःशेपः | १२ |
| ७ | बृहस्पतिः | पृथ्वी | वामदेवः | ११ |
| ८ | सवितृ | द्युः | गार्त्समदः | ११ |
| ९ | विष्णुः | द्युः | दीर्घतमा | ५ |
| १० | रुद्रः | अन्तरिक्षम् | गृत्समद् | ३ |

## ।। अथ इन्द्रस्य नामानि ।।

वृत्रहा सोमपा: शक्र: सुशिप्रश्च पुरन्दर: ।
वज्री सोमी वज्रहस्तो मरुत्वांश्च मरुत्सखा ।
मरुत्थानो वज्रबाहुर्हरिकेशो धनञ्जय: ।
हरिश्मश्रुश्चित्रभानु: सप्तरश्मि: शचीपति: ।
हिरण्यबाहुर्वृषा संवृक्समत्सुर्गोत्रभित्तथा ।
मनस्वान्पुरुहूतश्च त्वपांनेताऽच्युतच्युत: ।
आखण्डलोऽन्तरिक्षे स्यात् ऋषिर्गृत्समदश्च स: ।।

## ।। अथ अग्नेर्नामानि ।।

ऋत्विक् होता धूमकेतुर्विश्ववेदा पुरोहित: ।
हव्यवाहो मन्त्रजिह्व: कविर्दूत: कविक्रतु: ।
चित्रश्रवस्तमश्चापि रत्नधातमविश्पती ।
अङ्गिराश्च सहस्राक्षस्त्रिमूर्द्धोजोनपात्तथा ।
घृतप्रतीकोऽसुरोऽग्निश्च सप्तरश्मिरपांनपात् ।
घृतलोमो दमूनाश्च घृतपृष्ठो गृहपति: ।
अतिथिः स सहस्राक्ष: एष शोचिषकेश: ।
वैश्वानरो जातवेदो वर्णितो मधुच्छन्दसा ।।

## ।। अथ सोमस्य नामानि ।।

मौञ्जवत् पवमान: स इन्द्रपीत: शुचिर्दिव: ।
वाचस्पतिर्महिष्ठो वै हयुत्तमं स हविस्तथा ।
रक्षोहा वृत्रहन्तश्च मधुमानो वनस्पति: ।
विश्वचर्षणि: शुद्ध: स शुक्रोऽमर्त्य: शिशुस्तथा ।

विख्यात: पृथिवीस्थाने सहस्रधार एव च ।
औषधिपति: स एव ऋक्षु कण्वेन वर्णित: ।।

## ।। अथ अश्विनयोर्नामानि ।।

नासत्या मधवाना च तुविष्या अध्रिगू तथा ।
दस्रा हिरण्यवर्त्तानि दिवोनपात एव सः।
माध्वी नरा: सुदानू च देववैद्यो मधुयुवा ।
तौ पुष्करस्रजौ ज्ञेयौ मधुकशौ त्रिवन्धुरौ ।
दृष्टौ कक्षीवता तेन द्युस्थौ तावश्विनौ तथा ।।

## ।। अथ उषस: नामानि ।।

मघोनी सुभगा भद्रा गवांमाता ऋतावरी ।
अन्तिवामा सुजाता सा विश्ववारा च रेवती ।
चित्रामघा गोमती सा सूनरी सुनृतावती ।
उषा हिरण्यवर्णा सा अह्नांनेत्री च भास्वती ।
पुराणी युवति: ख्याता दिव: सा दुहिता तथा ।
ऋतपा मृत्यकेतुर्या सप्रतीकाऽमृताऽरुषी ।
अश्ववत्यर्जुनी द्युस्था वसिष्ठेनाभिवर्णिता ।।

## ।। अथ वरुणस्य नामानि ।।

दूतदक्ष: क्षत्रियो हि ऋतगोपा धृतव्रत: ।
असुरश्च स मायावी स्वराट् नाम्नापि ख्यात: ।
अमृतस्य यथा गोपा तथा स उरुशंश: ।

सम्राट् च सूर्यनेत्रः सः स्वर्णस्य भवनं तथा ।
द्युस्थ: स वरुणो दृष्ट: शुन:शेपेन त्वर्षिणा ।।

## ।। अथ बृहस्पतेर्नामानि ।।

गणपतिर्नीलपृष्ठ: सप्तजिह्व: सदस्पति: ।
मन्द्रजिह्व: सप्तरश्मिर्ब्रह्मणस्पतिरेव च ।
पथिकृत: सप्तमुख: सेनानीः कविः गीष्पतिः ।
वर्णितो वामदेवेन स प्रख्यातो बृहस्पति: ।।

## ।। अथ सवितुर्नामानि ।।

हिरण्याक्ष: सुपर्णश्च सुनीथ: स्वर्णनेत्र: ।
स्वर्णहस्त: स्वर्णपाद: स्वर्णजिह्वस्तथासुर: ।
सुमृकीको दमूना च हिरण्यस्तूप एव च ।
विचर्षणिस्तथा नाम हिरण्यपाणिरेव च ।
द्युस्थ: स सविता दृष्टो तेन गार्त्समदेन च ।।

## ।। अथ विष्णोर्नामानि ।।

उरुक्रमो विक्रमो हि उरुगायस्त्रिविक्रम: ।
भीमो गिरिक्षितश्चैव गिरिष्ठा वृष्ण एव च ।
कुचरश्च द्युस्थविष्णुर्दृष्टो दीर्घतमर्षिणा ।।

## ।। अथ रुद्रस्य नामानि ।।

भव: शर्वो यमो मृत्युर्नीलकण्ठ: स बभ्रु: ।
गिरिशश्च सहस्राक्षो नीलग्रीवो जगत्पति: ।
पशुपति: स च सेनानी शितिकण्ठ: स शंकर: ।
शिव: शम्भुर्भवो रुद्रो कपर्दी उष्णीषी तथा ।
असंख्याता सहस्राणि त्र्यम्बक: प्रथमो भिषक् ।
क्षेत्रपतिर्वनपति: पिनाकी ओषधिपति: ।
गणपतिर्वृक्षपतिर्दृष्टो गृत्समदा च खे ।।

**।। इति श्रीहरिविरचितश्छन्दोदेवादिसंग्रह: सम्पूर्ण: ।।**

**।। इति श्रीहरिविरचिता काव्यश्री: सम्पूर्णा ।।**





**Painting by – © Mrs. Meenaxi Patil**